विनापि तत्तद्यायाभेदार्थकत्वं इव कर्तृत्वाद्यर्थपष्ठ्या यैः लक्षणया साधुत्वप्रसंगात् सुरांसुलित्यादिसूत्र

53 प्रत्ययानुमसनमप्पफलं तत्फलं हि त्र्यादेशो नस्यादिना आदेशिनोऽभावे रूपस्थापनेन कर्मत्वादिविरोधोपपाद
नं स्व विभक्तौ लक्षणास्वीकारे अभाद्यनुपस्थापनेप्यादिना लक्षणयादिना कर्मत्वादिबोधनसंभवइति। ए
वं मनुष्यासनं विभक्त्यर्थान्तरत्वे साध्यत्वेऽथ कया द्विवचनेनेति अनुष्ठासनमप्पफलं एकत्वैकत्वं बहीत्यन्वये
कवचनसंज्ञासामर्थ्यादेव एकवचनादेरेकवत्वाद्यर्थतालाभात्। अत्र केचित्। उक्तानुष्ठासनसार्थक्याये क
विभक्तेरपरविभक्त्यर्थे लक्षणानुपगमात्। अभेदस्य च विभक्त्यन्तरार्थविरहे अत्र तृतीयानुलक्षणायां स्वा
विभक्तौ न लक्षणेति प्रवादविरोधइत्याहुः। मिथ्यास्तु विशेषपदस्य विशेषणज्ञाने न लक्षणा विशेषस्य तर
स्यावृत्तिः। अर्थस्य तत्र भेदानुमाने लिंगत्वेपि लिंगज्ञानस्यैवानुमितिजनकत्वात्। अर्थपदमुपस्थज्ञानला
क्षणिकमिति सोपचारिकपदप्रयोगात् तृतीयाया औपचारिकत्वमिति व्याचक्षुः। वाक्यार्थज्ञानविशेषइति प्रकृ
तवाक्यार्थविशेषितं ज्ञानमित्यर्थः। तस्य ताद्दृशज्ञानस्य अप्रसिद्धावाक्यार्थग्रहे प्राक्तज्ञानानंतरमज्ञाने
न अत एव वाक्यार्थस्य पूर्वमग्रहादेवाप्रसिद्धतिप्रतारणारूपदोषरहित इत्यर्थः। इति ज्ञातुमशक्यमिति सर्वे ५३

नार्थः ज्ञानत्वस्यास्मत्वस्य कुत्रापि पुंसामसत्वेन प्रकृतवाक्यार्थमंतर्भाव्य स्वीकरणीयमीदृशज्ञानमस्माकमित्य
र्थः शाब्द एवेति एवकारेण वक्तृज्ञानानुमानपूर्वकसंसर्गानुमानव्यवच्छेदः संसर्गानुमादिनिरासस्संभवेऽप
रिशेषानुमानानिर्वाहेण हेत्वसिद्धिरिति भावः एवं च शब्दस्यानानुवादकत्वमित्याशयः तात्पर्यावधारणा
र्थमिति युक्तिप्रयुक्तिमित्याशये र्थज्ञानस्य हेतुतायास्त्वप्यावश्यकत्वादिति भावः संसर्गविशेषप्रतीतेः प्रकृत
वाक्यार्थप्रतीतेः अनुपपत्त्यादिति तथा च तदर्थं वक्तृवाक्यार्थज्ञानानुमानस्यावश्यकतापि स्वीकरणीयतया
तदुपायानुसरणं द्वयोरेवावश्यकमिति भावः अथान्या शाब्दबोधात्पूर्वं शब्दाद्वाक्यार्थप्रतीत्यानुपग
मे न तात्पर्यं निरूपणमिति वाक्यार्थविशेषापरकृतात्पर्यज्ञानासंभव इत्यर्थः अत एव शाब्दवाक्यार्थज्ञान
स्य प्रागनुपपत्त्यादेव आप्तोक्तत्वानिर्वाह इत्यादिः निरूपणं निर्णयः सुकरमिति वक्तरि प्रकृतवाक्यार्थ
निरासस्संभवादिति भावः अयं चानुपगमप्रवादः वाक्यार्थमज्ञात्वापि स्वयंप्रमत्वानाभावत् प्रकृताविशेषप्र
री सा कांक्ष प्रकृतविशेषणज्ञानजनकत्वादित्यादौ सावक्तरि प्रकृतरीत्या वक्तरि प्रकृतवाक्यार्थप्रमादिनिरासं

54 से नैवं न परिशेषानुमाननिर्वाहात् अन्यथापरिशेषानुमानान्तरमेव संसर्गानुमानात् परिशेषानुमाने निर्वाहकत्वमा
दिति संसर्गानुमानापेक्षायामन्याप्यन्यथापातात् तत्तु वाक्यार्थज्ञानतात्पर्यधियो हेतुतयातात्पर्यज्ञानमपेक्ष्
णीयम् वाक्यार्थज्ञानं च प्रमितः कथं नैवेदित्याशंकां निराकरोति ज्ञाद्भुमिति प्रथमं तात्पर्यज्ञानात्पूर्वं न भवति तत्रै
व तात्पर्यज्ञानस्य हेतुत्वादिति भावः ज्ञानान्तरमानुमानिकसंसर्गज्ञानं न वस्येवेति तत्र तात्पर्यज्ञानाहेतुत्वाद्
ति शेषः न चैवमिति एवं ज्ञाप्यत्वे पूर्वं नियमतस्तात्पर्यज्ञानानुरोधेन शब्दवाक्यार्थस्योक्तापेण प्रमाणमिति
नानुमापकमित्यर्थः नैवदिति शेषः प्रागेव सिद्धिरिति प्रागेवानुमानतः प्रवृत्त्यादिकं सज्ञाननिष्पत्तेरित्यर्थः
तवापीति तात्पर्यज्ञानाहेतुतायाः अनपवादादिति भावः वेदस्थले वाक्यार्थस्य प्रमाणान्तरानवधार्यतया विल
क्षणसामग्र्या आवश्यकत्वात् लौकिकवाक्यजविलक्षणानुभवोपि सामग्रीबलसिद्ध इत्येवं समाधानमभिमतं
तनूपपादनावेन प्रकृतवाक्यार्थसिद्धौ तात्पर्यस्य हेतुत्वधारणतया तज्ज्ञानहेतुताया बाधकयुक्तत्वेनोक्ति सद् श्रीकृष्णजो
त्वेणापि तत्साधनम् अशक्यमिति तदहेतुत्वे दर्शितानुपपत्तयो अन्यथैव समाधेया इत्याशयेनाह तत्त्विति न त्वि ५४

सु

१६

नित्यथापीति तात्पर्ये ज्ञानेन नियमेन तावाक्यार्थज्ञानापेक्षोऽपीत्यर्थः अर्थविशेषसिद्धिः विशिष्टप्रकृतवाक्या
र्थसिद्धिः विशेष्यप्रकृतवाक्यार्थसिद्धिः विशेषणव्याप्यग्रहादिति प्रकृतवाक्यार्थज्ञानस्य प्रागसिद्ध्या विशेषरू
पेण तद्व्याप्यग्रहात्परिशेषानुमानाप्रवृत्त्या संसर्गसाधकहेतुत्वसिद्धिः प्रकृतविशेषणसंसर्गतत्समानविषयत्वयोः सहचा
राग्रहेणापि संसर्गानुमानाप्रवृत्तेरित्यर्थः साध्यहेत्वोरेकपदार्थघटितत्वे प्रकृतहेतुसाध्यसजातीयहेत्वन्तरसाध्यान्तरयो
र्व्याप्तिग्रहादपि प्रकृतहेतौ पक्षधर्मताज्ञानात् पक्षसाध्यस्याप्रसिद्ध्यासिद्धिः अन्यथा पाकादिविषयककार्यताज्ञानादि विशे
षेण ज्ञानेऽपि सन्नपानादिकार्यताज्ञाने तज्जोपस्थितिसाध्योः व्याप्तिग्रहात् प्रयोज्यवृद्धादेः पाकादिकार्यताज्ञानादेः सिद्ध्यनुप
पत्तेः व्युत्पत्त्यनिर्वाहादिति समाधत्ते ननु यथेति ज्ञानानीतिकार्यत्वेत्यादिः सामान्यतो व्याप्तिग्रहापेक्षया प्रकृतहेतुजा
तीयेऽक्वचित्साध्यव्याप्तिचारग्रहे सामान्यव्याप्त्याऽनुमितेरनुदयात् । न च पाकरूपपक्षे प्रवृत्तिविषयत्वरूपहेतुना कार्यताज्ञान
विषयत्वसाधने च पाकविषयपाकविषयककार्यताज्ञानसिद्धावप्यन्यदीयव्याप्तेरन्यसिद्ध्योपपत्तिकत्वमप्यापादितमिति वाच्यं
तावता प्रवृत्तिपुरुषीयपाकविषयककार्यताज्ञानसिद्ध्यनिर्वाहात् स्वपुरुषीयकार्यताज्ञानात्संशयासिद्धेः तत्पुरुषीयतत्का

55

त्वीनकार्यताज्ञानएवप्रयोजकत्वदृष्टान्वयव्यतिरेकानुविधानग्रहेणशब्दस्यानुभावकताभिसिद्धत्वाद्बोधकार्यताज्ञानसिद्धेरा
वश्यकत्वाच्चमिश्रास्तुएतदनुमायस्यैयस्यलाभान्तरानुसरणबीजमाहुः चेष्टाविशेषेतियसंख्याविषयकप्रत्याययनेषष्टीन
यदङ्गुल्युत्क्षेपणं तत्तदीयसंख्याभिप्रायपूर्वकमितिसहचारदर्शनंघटादिकमन्तर्भाव्यतत्रकतिघटाः सन्तीतिपृष्टेना
६ न्तरंदशाङ्गुल्युत्क्षेपणंदृष्ट्वादशघटविषयसंख्याभिप्रायंज्ञात्वाघटेतादृशाभिप्रायविषयत्वेनदशसंख्यामनुमिनोति
तत्रघटसंख्याप्रज्ञापनेच्छाधीनदशाङ्गुलदशाङ्गुल्युत्क्षेपणत्वघटीयदशसंख्याभिप्रायपूर्वकत्वयोर्व्याप्तिग्रहेणयदङ्गु
गुलीकर्मकमुत्क्षेपणंतदङ्कसंख्याभिप्रायपूर्वकमितिसामान्यज्ञानाच्चेष्टादर्शनाद्दशसंख्याभिप्रायस्यसामान्य
तएवग्रहसम्भवेपिसामान्यतोव्याप्त्येवघटेदशसंख्याभिप्रायज्ञानान्तत्तादृशज्ञानमित्यर्थः नचतत्रघटंपक्षीकृत्य
दशाङ्गुल्युत्क्षेपणप्रयोजकसंख्याभिप्रायज्ञानान्तत्तादृशज्ञानमित्यर्थः।नचतत्रघटंपक्षीकृत्यदशाङ्गुल्युत्क्षे
पणप्रयोजकसंख्याविशेषप्रज्ञापनेच्छाविषयत्वेनहेतुनादशसंख्याभिप्रायविषयत्वस्यतादृप्येणव्याप्त्येवसंगतत्वा श्रीराम.
द्धेत्वपसिद्धिः अतएवमिश्राणामुक्तानुमायेनयथावेसादिफक्किकावतारणमपुक्तमितिवाच्यंयतोऽहेता ५५

वुक्तसाध्यस्यतादूप्येण सहचारज्ञानं नासीत एव द्व्यादिसंख्याभिप्रायविषयघटादावेकद्व्यादिसंख्याभिप्रायः वकद्व्या
द्यंगुलन्यूनत्वक्षेपणं दृष्ट्वा यदीयप्रतीतौ बाधी न यत्संख्यांगुलन्यूनत्वक्षेपणं यत्तत्तद्विषक तत्तत्संख्याभिप्रायपूर्वकमिति सामा
न्यतो व्याप्तिर्गृहीतात्तत्रापि घटे दशांगुलन्यूनत्वक्षेपणदर्शनात्तदीयदशत्वज्ञानस्यानुमितिकतया अन्यदीयव्याप्या अन्यसा
ध्यसिद्धप्रसङ्गभयावश्यकत्वात् तत्त्वयवक्तृकरिवाक्यार्थज्ञानस्य यंवं संसर्गानुमानेऽपेक्षितं तत्तद्विशेष्यतत्तद्विशेषणविशि
ष्टज्ञानविषयकत्वसिद्धेश्च वनिर्वाहात् अतोऽत्र माधवत्प्रत्याप्यस्तरवाक्यजन्यवाक्यप्रयोक्तृत्वरूपगुरुहेतुकवक्तृपक्षका
ल नुसरणमयुक्तमिति साम्प्रायेन घटहेतुकवाक्यपक्षकवाक्यार्थज्ञानसाधकमनुमानमाहुपहूतिसाकांक्षेति सेकादिवि
षयकं यत्सेकादिसाकांक्षपयःकरणकत्वादिविषयकज्ञानं तद्धेतुकमित्यर्थः आप्तोक्तेः सतीति अत्र मादिज्ञानजन्यत्वमेवात्रा
प्तत्वं तथा च अत्र माघज्ञानजन्यत्वे सतीत्यर्थः एतत्त्व अत्र माघज्ञानजन्यवाक्यविशिष्टवाक्यार्थज्ञानजन्यत्वरूपसाध्यस्यापि व्यभि
चारवारणाय ज्ञकादिवाक्ये व्यभिचारवारणाय विशेष्यदलं एतदर्थप्रतिपादकत्वं च सेकादिविशेष्यसाकांक्षपयः
करणकत्वादिविशेषणप्रतीतीच्छयोच्चरितत्वं तत्तु मादृशप्रतीतिजनकत्वं ज्ञकादिवाक्यस्यापि तादृशप्रतीतिजनकत्वा

56

तादीदृशानुमाने चन्द्रमादिनिष्ठा सत्त्वापेक्षितः। न तु प्राथमिकमन्यतरजन्यत्वासाधकानुमानमपि तत्साध्यस्यात्र हेतु
घटकत्वात् उक्तप्रतीतीनां योग्यचरितत्वं च विशिष्टवाक्यार्थगर्भमिति वाक्यार्थम ज्ञात्वापि प्रकरणादिना सुग्रहं शुकादिवाक्य
त व्यभिचारवारणाय तत्त्वेनेह हेतुव्याख्यानात् तद्रहस्यापेक्षितत्वया तस्याव्युत्पोपपत्वात्। सामान्यव्याप्त्यात्र तु उक्तवाक्यवदि
ति दृष्टान्तरसंगतिः तदर्थश्च त्रमा घजन्यकर्मत्वादिमाकांक्ष घटादिप्रतीतीनां योग्यचरितत्वं कर्मत्वादौ घटादिविशिष्टज्ञान
कं मदीयं घटमित्यादिवाक्यमिव इति। एतदनन्तरं इत्येवानुमेयमिति पूरणीयं ततः स्वस्य एवमित्यस्य पूर्वं पूरणीयं अनु
मानं इत्यनेन संबंधः एते पदार्था इत्यादिकं पूर्ववद्व्याख्येयं स्मरणं तज्ज्ञानवति रजनतत्त्वविशिष्टज्ञानविषयरजत
त्वसंसर्गिधर्मिवदित्यर्थः ज्ञानदस्यानुवादकत्वमुपसंहरति एवमिति। वेदतुल्यतयेति वेदवत्तत्त्वेन कृप्त सामग्रीस
मवहितत्वयेत्यर्थः वक्तृज्ञानावच्छेदकतयेति वक्तृज्ञानानुमानसाध्यतावच्छेदकतयेत्यर्थः तदनुमानादिति
शेषः सिद्धिरित्यग्रिमेणान्वयः एतद्वाक्यार्थघटितसाध्याभिप्रायेणोक्तपाठ्यार्थस्य प्रकृतविशेषणवद्विशे श्रीकृष्णा·
ष्यकत्वरूपतया वाक्यार्थस्य प्रवेशात् तदनुमाने विशिष्टज्ञानत्वेन साध्यत्वे तु तत्र मतसिद्धिरित्याशयेनाह तदनुप ५६

ज्ञीवितिमेचेत्यादिनाभिहितादिशा विद्धिः सिद्धिरितियथार्थतत्त्वज्ञानानुरोधेनानियमतः स्वीकार्येत्यादिविशेषः तमाद्यनु
मानानंतरं अस्फुटत्वेन निर्वाहः यत्तोमतमुपन्यस्यतिपत्तितियकृत्संसर्गाग्रहो भ्रमइति प्राञ्चः तत्र यथाश्रुते असंसर्गाग्रहा
भावस्य संसर्गाग्रहाभावात्मकत्वया तद्भावः संसर्गाग्रह एव स संगतं अतो भ्रमपूर्वं मकारप्रश्लेषेण असंसर्गाग्रहाभावः
अभ्रमः भ्रमाभावः तद्भावः तदात्मकोऽभावः संसर्गाग्रह एवेत्यर्थः आप्तत्वानुमानांतर्गतमेवेति आप्तत्वानुमा
नात्मकमेवेत्यर्थः वक्तृज्ञानानुमानं वक्तृसंसर्गज्ञानानुमानं न्वितिभ्रमाभावेन लिंगेनेति वक्तृज्ञानमनुपेयमि
त्यर्थः ज्ञानद्वयमगृहीतभेदं अत्र संसर्गाग्रहविशिष्टधर्मधर्मिविषयकज्ञानद्वयमित्यर्थः तदग्रावच्छेत्ति विशेषणभू
तज्ञानद्वयकालीनस्ताद्दृशविशिष्टाभावश्चेत्यर्थः गृहीतभेदं ज्ञानमितिधर्मिणोधर्मिणावविषयकज्ञानरूपज्ञा
नंविशेषणाभावइत्यर्थः ननु तयोः संसर्गाग्रह इतिशेषः संसर्गाग्रह एव कथं न भ्रम इत्याकांक्षायामाह नहीति
यतः सुषुप्तौ ज्ञानसामान्याभावसत्वेन संसर्गज्ञानाभावसत्वेपि न प्रवृत्तिः तत्र व्यवहार इत्यर्थः वक्तृज्ञानानु
मानमितिज्ञानवत्त्वकमिति विशेषः आप्तत्वानुमानस्य वक्तृसंसर्गज्ञानानुमानरूपोपगमे पृथग्मानानुमानं वक्तृज्ञा

57

नानुमानाधीनपदार्थसंसर्गानुमानञ्च व्यर्थं इत्याह किं चेति लिंगं लिंगज्ञानं यथार्थज्ञानानुमायकमिति शेषः तादृशमे

वन ज्ञानमेवेत्यर्थः गमकमस्त्वित्यत आह प्रमाजनकमस्तु तन्मते यथार्थज्ञाननातात्पर्यस्यैवव्वत्वाद् यथार्थज्ञानानुमायकत्वा

दिति भावः अस्मन्मते त्वनाप्तवाक्यसहितत्वमादिविशिष्टज्ञानानाप्ताभिप्रायवाक्यजन्यप्रयोजकत्वरूपहेतुज्ञानस्यावृत्ते

यथार्थज्ञानानुमापकत्वायोगौरवेणतस्य त्यागात् प्रमाप्रयोजकहेतुतया यथार्थतात्पर्यज्ञानस्य तद्धेतुतयानस्य च प्रागवृत्ति

त्वेनतन्निर्वाहाय संसर्गानुमानस्य वक्तृज्ञानानुमानस्यावश्यकत्वात् उक्तहेतुघटकविशेष्यभागासिद्ध्यर्थं प्रथमानु

मानस्यतथात्वमिति भावः अस्तु पेसत्त्वमाप्तवादिनुमानस्यानन्तरमेवकर्तव्यतीत्याप्तिमाह किं चेत्यादिः यादृशा

लिंगमिति वक्तृज्ञानानुमापकलिंगघटकं यद्वक्तृत्वं स्थलभित्यर्थः तादृशमेव तु दैवगमकं संसर्गानुमापकमस्तु य

थार्थवाक्यार्थधीपरत्वं यथार्थवाक्यार्थप्रतीतीच्छयोच्चरितत्वं यथार्थतात्पर्यं न—गतं अप्रयोजकं त्वाद् प्रमोजनक

ज्ञानविषयत्वेन ज्ञानत्वेन तद्धेतुत्वे गौरवादिति ॥ ॥ श्रीकृष्णः ॥ ॥ तस्याकांक्षादिकं सहकारी श्रीकृष्ण·

तिपूर्वग्रन्थेन स्मारितायाः आकांक्षायाः प्रसंगतो निरूपणमारभते अथेति · इच्छारूपायाआकांक्षायाः प्रसि ५८

रूत्वादियमिति॰ शाब्दबोधोपयोगिनीत्यर्थः अविनाभावघटितविशेष्यतावच्छेदकेति विशेषणस्य त्याज्यमितरविशे
ष्ये विशेषणस्य स्वप्रयोज्यतासंबंधविरहो वा अविनाभावपदेन विवक्षितः स चार्थधर्मोऽपि परंपरासंबंधेन शाब्दसाकांक्षत्व
व्यवहारहेतुः तत्राद्यहेतुमाह नीलमितीति अन्नाचारितिसंबंधोत्कलत्वादिरूपविशेष्यतावच्छेदकविशेषणनीलाद्यविनाभा
वादित्याभावः तथा च तत्राकांक्षानुपपत्तिरिति भावः तत्र नीलादिविशेष्यस्य शोजादिव्यक्तिविशेषेण तद्विनाभावस
त्वेऽनलान्वितत्वद्वितीयपक्षे न दोषः अतः तत्र दोषांतरमाह बिमलमितीति नघाऽऽदि जलान्वयितया तात्पर्यविषय जलान्वित
स्य संबंधस्येत्यर्थः अविनाभूततत्कच्छेद इति अविनाभूतेनवाक्यांतरगच्छपदार्थव्यक्तिविशेष्यइत्यर्थः केवलान्वयि
सविशेषणत्वेऽव्याप्तिरप्रतन्ययपक्षे दृष्टव्या॰ समभिव्याहृतेति॰ समभिव्याहृततत्तत्पदस्मारितजिज्ञासितस्वार्था
न्वयकत्वं स्वस्य तत्पदाकांक्षेत्यर्थः उत्कटेच्छालेकद्वयदस्य नघाऽऽदेरनेनसाकांक्षतावारणाय समभिव्याहारनिवे
शः पदयोः समभिव्याहाररूपाकांक्षासः शाब्दबोधज्ञानएवोपयुज्यते तद्रूमेण शाब्दस्य मानत्व तत्पदस्मारि
तार्थयोरन्वयबोधेज्ञाततया अस्साकांक्षतावारणाय एकपदार्थेऽपरपदार्थान्वयप्राग्जिज्ञासानिवेशः स्वविषयज्ञा

58

नसिद्धेर्जिज्ञासानुदयान्नद्वारंजिज्ञासास्वरूपायाश्च शाब्दबोधेस्वरूपसत्युपयुज्यतेस्माच्चस्वविषयानुपहितत्वेनक्रिये
षणीयाऽन्तोजिज्ञासाद्वितीयक्षणेशाब्दबोधोत्पत्तिस्थलेनदानींजिज्ञासासत्त्वेपिनाकांक्षाबोधद्वयेछास्थलेएकबो
धोत्पत्तिदशायामाकांक्षानिर्वाहायविषयतावच्छेदकावच्छिन्नानुपधानंवाच्यंअजिज्ञासोरपीतिनतत्संसर्गबोधेनिष्फ
लत्वंदुष्फलत्वंवायदायेनगृहीतंतदातत्फलस्यतदिच्छाविरहेपिवाच्यश्रवणेपिवाक्यार्थबोधस्यानुभवीकत्वयातन्त्रा
कांक्षायाअवच्छेदसंपस्वीकार्यायाअनुपपत्तेरित्यर्थः। ननुतत्रमानसएवसंसर्गबोधोनतुशाब्दइत्याकांक्षाविरहा
दित्तोऽर्थाध्याहारादक्षेपदस्मारितत्वस्यविवक्षणस्यतदर्थेऽभावादव्याप्तिरित्साहविश्वजितेतिविश्वजित्सा
पतैतेस्वत्रश्रुतोअध्याहृतस्यस्वर्गकामस्याधिकारिणः द्वारमितिलौकिकवाक्येचाध्याहृतपिधानरूपस्या
र्थस्यपदस्मारितत्वाव्याप्त्याकांक्षितत्वात्कार्यत्वपिधानकर्मत्वान्वयबोधविषयत्वयातत्स्वाकांक्षत्वायाअव्याप
कत्वादित्यर्थः तदभावापत्तेरितिशेषः शाब्दकल्पनपक्षेशाब्दाध्याहारवादिनैयायिकमतेऽदमुपलक्षणं। स
मभिव्याहृतपदत्वमभिवेशस्यस्मृतिस्थलेऽन्नानसामान्यनिवेशः गुरुमतेचेत्सपिबोध्यं। अपीत्यस्यपूर्वेणान्वयाकांक्षो श्रीकुसा० ५८

यपन्नाविति पूरणीयं गुरुमते त्वव्याहृतार्थस्य श्रुतपदसमभिव्याहृतानुमानोपस्थापितत्वेन नाद्यानुमानेन न्यूनत्व
स्य साकांक्षत्वोपपत्तिरिष्टत्वाजिज्ञासितत्वस्य जिज्ञासार्थकानयनपदादेः आकांक्षत्वोपपत्तिरिति स्वार्थानकम
त्वादेर्भेदान्वय इति चेदादिः आजिज्ञासोपपत्त्यापादबोधः तादृशस्यत्वसाधारणस्वरूपजनितान्वयव्यावृत्तं जिज्ञासा
योग्यताघटितलक्षणमाशंकते योग्यतेति सांकाक्षसंसर्गयोग्यतासंसर्गावगमप्रागभावरूपा वाच्या तत्रोदक्ष
रतावारणायाह जिज्ञासाचेति विशेषज्ञाने स्वविषयसंसर्गावगमाभावोगेवमवतिम विनुमर्हतीत्यपाचपदेवयत्सत्वं
तद्रूपेवयोग्यतेति भावः योग्यताचेति तादृशीच योग्यते त्यर्थः श्रोतरीति तत्सदानुसंधानवति पुंसीत्यर्थः तथाच
तत्सदविषयकतत्तदनुसंधानेत्यर्थः तथाच तत्तत्सदविषयकतत्तदनुसंधानजन्यप्रकृतसंसर्गावगमप्रागभावः
तदनुसंधानविशिष्टात्मनिष्ठः तयोः पदयोः साकांक्षत्वेत्यर्थः प्रागभावस्य पदे साकांक्षव्यवहारनिमित्तं स्वप्रतियो
गिजनकत्वरूपः संबंधः जनितान्वयबोधदशायांत्वनुगतानुतिसंधानजनितस्यान्वबोधान्तरस्य प्रागभावमादाया
तिप्रसंगवारणाय तत्तदनुसंधानविशिष्टात्मनिष्ठत्वं एकक्षणावच्छिन्नैकात्मवृत्तित्वसंबंधेन तत्तदनुसंधानविशि

स्वात्मनिष्ठत्वं एकक्षणावच्छिन्नैकात्मवृत्तित्वं संबंधेन तत्तदनुसंधानविशिष्टत्वपर्यवसितं प्रागभावविशेषितं तत्तदनुसं
धानजन्यत्वविशेषणप्रयोजनं स्वयमाह विभक्तमिति। तात्पर्यवशादिति। नद्या इत्यस्य कच्छे स्वार्थान्वयतात्पर्यवशा
दित्यर्थः नद्याः नदीसंबंधस्य कच्छे संसर्गावगमात् कच्छे न संसर्गावगमप्रयोजनेत्यपि न संबंधः तात्पर्यवशादिति जला
न्वयतात्पर्यवशादित्यर्थः। एतज्जलान्वितत्वे हेतुः जलान्वितमिति। जलान्वितत्वयाभासमानस्य नदीसंबंधस्ये
त्यर्थः। न तत्प्रागभावः तत्तदनुसंधानजन्यनदीकच्छसंसर्गावगमप्रागभावः प्रसिद्ध्यतीति शेषः तथा च तत्तदनु
संधानकाले नद्या इत्यस्य साकांक्षेति भावः तथा सति कर्मत्वादिसाकांक्षपदानुसंधानजन्यस्य कर्मत्वादे
र्घटादेर्भेदे संसर्गावगमस्य प्रागभावसंभवादित्यर्थः प्रतियोग्यप्रसिद्धिरिति भावः। न च यत्पदानुसंसर्गावगमोऽप्र
सिद्धः तदनुसंधानजन्यतात्पर्याकांक्षायाहेतुत्वकल्पनासंभवात् सामान्यसामग्रीतः तदनुसंधानदशायां शाब्द
बोधापत्तिर्दुर्वारैवेति। न त्वयं यद्यदनुसंधानव्यक्तिभिः शाब्दबोधो जन्यते तत्तदनुसंधानजन्यशाब्दबोधप्रागभा
वादिघटितसामग्रीविरहकूटस्यैव तत्रत्यशाब्दसामान्यानुत्पादप्रयोजकत्वात् प्रागभावस्य सिद्ध्यसिद्धिपराहत

त्वादिति भावः प्रागभावप्रसिद्धेरप्रसिद्धेर्वोपगमे निराकांक्षव्यवहारस्य व्याघातादित्यर्थः। प्रतियोगित्वेऽभावव्यव
हारविषयस्य तदभावस्याप्रसिद्धत्वादिति भावः ननु तदानीं निराकांक्षव्यवहारस्य तदानीं तन्न प्रागभावसंसर्गावगम
सामान्ये तदानीं तन्नानुसंधानजन्यत्वाभावो विषयः संसर्गावगमसामान्ये तदानीं तन्न प्रागभावप्रतियोगित्वं तदान
नानुसंधानजन्यत्वाभावो वा तथा च न सिद्ध्यसिद्धिव्याघातः पदविषयकत्वेन यदनुसंधानव्यक्तिः यत्र प्रकृतसंसर्गा
वगमे हेतुतानत्वं संसर्गावगमप्रागभावविशिष्टतदनुसंधानव्यक्तीनां तत्समुदायनिष्ठविषयतासंबंधावच्छिन्नाभाव
कूटस्य निराकांक्षव्यवहारोपगमाद्ध्यनुपपत्तिरित्याशंक्य दोषांतरमाह किंचेति एकः श्रोता विमलजलमित्यस्य
श्रवणेन नदीसंबंधस्य जलान्वयतात्पर्यमेवागाहते नेति श्रुत्वैवेत्यंततात्पर्यकत्वमाहूतितः श्रवणेपि कस्यचिज्जलान्वयपरता [illegible]
त्वमव च नेत्यर्थः नद्याः नदीसंबंधस्य एवमग्रेपि समस्तामिति विमलमित्यस्य उभयोरपीति विभिन्नपुरुषयोः
जले कच्छे च न घाइतिपदानुसंधानन्नदीसंबंधानुसंधानजन्यपूर्वबोधप्रागभावयोः पुरुषभेदेन समत्वादिति भावः नच
श्रोत्रोः तन्नयसंसर्गावगमादन्वयपुरुषभेदेन घाइत्येकपदस्य नदीकच्छोभयसाकांक्षत्वमेवेति वाच्यं अ समभिव्या
नदीसंबंधावगमोदयात् न घाइतिपदं जलकच्छोभयसाकांक्षं स्यादित्यर्थः तदनुसंधानजन्योभयान्व २

इतरपदार्थाकांक्षायां सत्यामेव शाब्दबोधजननात्तत्र समभिव्याहृतनदीकच्छपदयोर्निराकांक्षतायामवश्यमु
पेयत्वात्तच्चैवमप्युन्नयत्र साकांक्षतापत्तिर्न संगच्छते न घट इत्यस्य जलसाकांक्षताया इष्टत्वादिति वाच्यं उभयसा
कांक्षत्वस्यादित्यस्य यथा जलसाकांक्षं तथा कच्छसाकांक्षं स्यादित्यर्थकतया न संगच्छते अतो नान्वययोग्यताघटि
तलक्षणे इष्टवानापि पदयोः समभिव्याहारस्य निवेशनीयत्वान्नायं दोषः तस्य ज्ञातस्यैव शाब्दबोधोपयोगितयाक
च्छे नदीसंबंधान्वयबोधस्य तज्ज्ञानानुपपत्तिरिति तत्प्रागभावरूपायाः आकांक्षायाः शाब्दबोधहेतुतामेवाखंडय
ति प्रागभावस्येति तदनुसंधानविशिष्टतदनुसंधानजन्यशाब्दबोधप्रागभावस्य यत्राभावः घटः कर्मत्वं नयः
कृतिरित्यादौ प्रथमकारणं प्रकृतिविभक्त्यानुपूर्वीज्ञानरूपस्य च तदुत्तरं च समभिव्याहारज्ञानस्य वा आवश्यकत्वा
दित्यर्थः यथाश्रुतं तु न संगच्छते घटः कर्मत्वमित्यादिपदानुसंधानजन्यशाब्दबोधोत्पत्तिकाले तत्प्रागभावाभावस्य
तदेपकारणांतराभावनियतत्वाभिधानविरोधात् कुत्रचिदुत्पन्नव्यक्तेः पुनरुत्पादः प्रागभावविरहेणैव वारणादु
क्तनियमायोगाच्च न चोक्तरूपाकांक्षाहेतुत्वे दिना प्रकृतिप्रत्ययमानुपूर्व्य विशेषहेतुताया अनुपगमात्तत्र

श्रीराम
६०

तः तेन प्रागभावरूपायाः प्राक्काङ्क्षाया अन्यथासिद्धिरित्युपदर्शितव्याख्यानमपि न स्यादिति वाच्यं न तदनुसंधानव्यक्ति
भेदेनानन्तकारणकल्पनमपेक्ष्यानुपूर्वीरूपविशेषज्ञानहेतुकल्पनमेवोचितमित्याशयेन कारणान्तराभावासंभवाव
रूपकत्वाभिधानसंगतेः न च तत्तद्व्यक्तिपूर्ववर्तित्वसमानविषयत्वाद्व्याप्यं तदैव ज्ञायमाने तत्तद्व्यक्तेरभावादेवारणा
यत्तत्तद्व्यक्तौ तत्तदनुसंधानव्यक्तीनां तत्तद्व्यक्त्युत्पादक्षेपात् तदुपधायकपदानुसंधानव्यक्तिव्यापारसत्त्वेन तत्तदनन्त
रक्षेपात् तत्तद्व्यक्त्युत्पादात् प्रागभावस्य हेतुत्वकल्पनमावश्यकमिति वाच्यं पक्षाद्बोधव्यक्त्युत्पादकालेनन्तनकयोग्य
ताज्ञानादिनियमः तदनन्तरक्षेपो नाद्यसामान्यकारणाधारणाभावादेव तद्व्यक्त्युत्पादापत्त्यसंभवात् सर्वत्र शा- य
द्बोधे प्रागभावरूपाकाङ्क्षाहेतुत्वासिद्धेः । न च सम्पत्तियोग्यज्ञानकानुसंधानविशिष्टपदेन संसर्गावगमप्रागभाव
रूपप्रागभावाकाङ्क्षायाः अनुगतरूपावच्छिन्नस्य कृतसंसर्गावगमे एकैककारणत्वमेव संभवतीति किमर्थमानुपूर्वी
विशेषज्ञानत्वादिना हेतुत्वान्तरकल्पनमिति वाच्यं घटः कर्मत्वमित्यादिपदानुसंधानस्यापि पदत्वरूपमान्यथ सा
मपुरस्कारेणाकर्मत्वघटीयमित्यादिशाब्दबोधे हेतुतया तद्विशिष्टसंसर्गावगमप्रागभाववत्त्वात्तादृशाब्दोत्पत्तिवार

तांनेर
श।

पापफलोपधानकजनतायां ज्ञानेऽप्येवकारणतावच्छेदकेभिन्नविशेष्यताभावात् दृष्टापत्त्यानुसंधानेच शाब्दबोधानुपधाने
शाब्दबोधानुपधानप्रयोज्यस्य निरुक्तकारणविरहस्य प्रयोजकतया आनुपूर्वीविशेषज्ञानप्रविरहस्यैव तत्प्रयो
जकतायाउपगंतव्यतया न ज्ञानहेतुतायां आदृष्टाप्रागभावहेतुत्वस्य आवश्यकत्वात्. ननु यथा श्रुतमिसमनंतरं
समानविषयकानुमित्सेतरणाय सिद्धेरनुमितिप्रतिबंधकतानुपपत्तेः तथा च शाब्दबोधानंतरमपि समानविषय
कशाब्दधीवारणाय तादृशशाब्दबोधे तादृशशाब्दबोधस्य प्रतिबंधकत्वमावश्यकं ध्वंसप्रागभावयोरसत्ताश्रा
वविरोधितामते शाब्दसिद्धेः सामान्यरूपा सत्ताभावस्य हेतुता न संभवतीति तच्छाब्दबोधव्यक्तीनां न तद्व्यक्तित्वाव
च्छिन्नाभावकूटस्यैव समानविषयकशाब्दत्वावच्छिन्नहेतुता वाच्या. तथा तत्तद्व्यक्तित्वावच्छिन्नाभावत्वेन तत्तद्व्य
क्तिव्यधिकरणशाब्दबोधे व्यतंत्रनराभावसोवततद्व्यक्तिसमानाधिकरणशाब्दबोधे प्रतत्तद्व्यक्तिध्वंसप्रागभावयो
रपि हेतुत्वसंभवात् तथा च मदंतर्गतसहेतुसैवाकांक्षाहेतुतेत्युसंभामिति चेत् इतरथा वत्कारणसत्त्वे शाब्दानु श्रीराम.
नवानंतरं तासमानविषयकशाब्दबोधानंतरानुत्पादस्यैवासिद्धत्वया शाब्दबोधप्रतिबंधकतायाएवासिद्धेः ६१

अतः एवां सहेतुलक्षणेऽयमेत्रीयादौ पुत्राद्यन्वयबोधोत्पत्तिकाले पुराजपुरुषान्वयबोधानुत्पादप्रयोजक
कारणाभावादत्रापि राजपुरुषान्वयबोधानुत्पादः सन्निवर्तीस निधाय जनितान्वयबोधत्वरूपविशेष्यदलवै
यर्थ्याभिधानमपि संगच्छते समानविषयकत्वात् बोधामंतरेंत्रण वबोधांतराऽनुत्पादे सन्निवेशाहाय तद्दलप्रवेशस्या
वश्यकत्वपात निरूप्यतेन त्वानुपूर्वी विशेषज्ञानादिनानभागभावकूपापाद्या कांक्षाया अन्यथा सिद्धिः एक
विधत्वात् बोधे नानाविधत्वानुपूर्वीज्ञानानां हेतुत्वकल्पनमपेक्ष्य घटः कर्मत्वं घटीय मित्याद्यन्वयबोधवार
पायत्वाद्बोधप्रागभाववैव स्वजनिकारणानुसंधानवत्वसंबंधेनैकहेतुताकल्पनौचित्यात् न च घटकर्मत्व मि
त्यादिपदज्ञानस्यापि यद्ज्ञानत्वेन तादृशान्वयबोधयोग्यत्वं फलोपधानरूपकारणतायाः तद्घटितसंबंधे
नप्रागभावरूपकारणस्योक्तस्थलेऽसत्वं फलानुत्पादप्रयोवारणाभर विरहस्य प्रयोज्यत्वानुपगमस्यावश्य
कत्वयाऽनिप्रागेवेनिरुक्तमिति वाच्यं अन्यथा हेतिकारणतायाः संबंधे त्वघटकतया पदत्वज्ञानत्वादिना सामा
न्यकारणताया व्याहतिसंभवेन फलोपधानानिवेशादनुसंधानव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नायाः तत्तद्व्यक्ति

62

कारणतायां सर्वसिद्धत्वापाघटमित्यादिपरानुसंधानस्थलेऽनयावृत्तितादात्म्यकारणताघटितसंबंधेन शाब्द-
बोधोपलक्षितत्वे तद्ज्ञानमेव शाब्दबोधकारणमस्तु । सामान्यविशेषकारणतयोरवच्छेद्यावच्छेदकभावे शाब्दा-
भ्युपानस्व कारणादिति वाच्यं किं प्रागभावहेतुतयेति वाच्यं शाब्दबोधोत्तरं क्वचित्समानविषयशाब्दबोधोपगमे-
पि तत्सत्त्वे तदुक्तेः पुनरुक्तशाब्दवारणायोक्तसंबंधेन प्रागभावस्यानुगतकारकतानोचितत्वादि तात्पर्यकं प्रतिवं-
त दिमाह । एवं चेति । उक्तप्रागभावहेतुत्वे ह्यतिप्रसंगं निराकृत्यानुपूर्वज्ञानात्मनो हेतुताखंडनमेवेत्यर्थः । न हेतु-
रिति तथा च तयोः शाब्दबोधहेतुतासिद्धान्तः नत्वेतेतिभावः ननु बाधकमाननाभावः शाब्दस्थले पो॰ सुच्य ग्य
सा तेतस्य वानुमित्यादिस्थले शाब्दबोधारणधर्मावच्छिन्नहेतुतायाश्च क्लृप्तत्वात्कथं तत्र हेतुत्वमापद्यतां इ-
त्याशंक्यानुमित्यादावपि बाधाभावस्य हेतुतां खंडयति न चैवमिति न ह्येवमित्यर्थः एवमुक्तप्रागभावहे-
तुतयामतिप्रसंगे प्रागभावे नैव नैवेति अनुमित्यादावपि नानाविधबाधाभावादिहेत्वभावहेतुतायास्व श्रीहरः
क प्रतियोगितत्पदरूपपरामर्शादिसंबंधेनानुमित्यादिप्रागभावहेतुतासंभवात् बाधादिकालीनपरामर्शादौ ६२

नातत्तद्व्यक्तित्वेनानुमितिजनकत्वाशंकादृढाकारत्वबाधेनैव बाधादिकालेऽनुमित्साद्यभावनिर्णयात्तदुक्त्य
र्थः ननु बाधादिवृत्त्यनंतरक्षणोत्पन्नपरामर्शेण बाधनाशेऽनुमितिजननादुक्तसंबंधेनानुमितिप्रागभा
वतादृशपरामर्शोत्पत्तिक्षणेऽपि सत्वाद्द्वितीयक्षणे यामेवं बाधादिवृत्त्यभावेनानुमित्यापत्तिरतो बाधाद्यभावस्या
नुमितिहेतुत्वमुक्तं द्वितीयक्षणे त्वबाधहेतुत्वमात्ररूपकमित्यादौ अंशं कृत्वा णांतरमाह प्रागभावस्यैवेति शब्देनासा
धारण्यमितिन शब्दप्रमाणसाधारणसहकारित्वमित्यर्थः कार्यसामान्यहेतुताव्यधिकरणहेतुता~~व्य~~
नायाएव साधारण्याद्धेतुतारूपत्वादिति शेषः तथा चैतन्मते आकांक्षायाः शाब्दसाधारण्यसहकारित्वरूप
त्वेति भावः ननु शाब्दानुभवमात्रवृत्तिधर्मावच्छिन्ननिरूपितो यः प्रागभावहेतुतयैव तद्रूपाकांक्षायाः शाब्द
साधारणसहकारित्वप्रवादः इत्यत आह उपस्थितेति उपस्थित्याप्यव्यवहारविषयायाः ससंबंधिकनिःसं
बंधिकपदाकांक्षायाः तव्यवहारनिमित्तत्वेनोज्जातिविशेषरूपोत्कर्षो न स्यात् इत्यर्थः तदानीं ज्ञा
तिमत्वासासमयात्पत्रदपिदूषणमाया ततः सिद्धांते प्रभावरूपाकांक्षोपगमात्तादृशार्थकपदनिष्ठ

तायाश्चाकांक्षायाः उत्थितादिश्च व्यवहारविषयनियामकता उपगंतव्या ननु जातिविशेषयोरितिप्रागभावस्वरूपाकां
क्षायक्षेप्युपपत्तेः सोऽन्वयस्य लक्षणमात्रं कतेत्रयेति ज्ञाप्येति ज्ञाप्यः प्रकृतन्यायशब्दबोधविषयोपस्तसदार्थः नदि
तरपदार्थयोः प्रकृतविशेष्यविशेषणयोरन्वयः संसर्गः ज्ञानांशे विषयितासंबंधेन तत्सकारिकाया जिज्ञासाप्र
कृतविशेष्यतावच्छेदकावच्छिन्ने प्रकृतविशेषणतावच्छेदकावच्छिन्नस्य संबंधविधयायन्स्य कृतसंसर्गविषयक
त्वेनइपरक्तज्ञानगोचरेच्छे क्रियावत्त्वं तदनुकूलीयविशेष्यविशेषणयोरुपस्थितौ तज्जनकपदनिष्ठमज्ञनितत्ता
त्पर्यविषयान्वयबोधकत्वं तात्पर्यविषयतावच्छेदकावच्छिन्नशाब्दबोधानुपधानकृतयोः पदयोस्तादृशान्वय
बोधोपयिकाकांक्षोऽस्यर्थः सरोजं नीलमित्यादौ नीलमिसादि सादिमात्रे कोऽचु किं सरोजमन्यद्वारस्यादिविशे
षतो विशेष्ये नीलादेर्विशेषणस्याभेदसंसर्गजिज्ञासासरोजमित्यादिमात्रे कोऽच किं नीलमन्योदृशं वेत्यादिः
सरोजादिविशेष्ये विशेषताविशेषतो विशेषणस्याभेदादिसंसर्गज्ञायतइति तादृशजिज्ञासायाः नीलसरोजा श्रीराम
द्युपस्थितेर्जनकतया समानप्रक्तिक नीलसरोजादिपदयोः परस्परसाकांक्षत्वं जिज्ञासानुकूलोपस्थितिघ ६३

त्रि

दिनाकांक्षादर्शात्पुरोडाशकपालेनतुषानुपवपतीत्यादौ पुरोडाशायकपालमितिचतुर्थ्यर्थसमासत्वा
न्नोपपद्येतेतत्समासोपगमेहिपुरोडाशकपालपदात्पुरोडाशप्रयोजककपालत्वेनैवोपस्थितिर्नैवतत्तथा
वमतिकपालस्यपुरोडाशस्यप्रयोजनत्वलाभोनप्रयोजनजिज्ञासायाःसंभवात्तुषोपवापरूपबोधोप
का यिंकांक्षाननिर्वर्होदितिघटःकर्मात्वमानयतीत्यादौ॥ क्रियादिपदाधीनतदन्वयिकारकादिजिज्ञासामात्र
मादायक्रियाकारकयोराकांक्षादितिजिज्ञासान्वयजनकोपस्थितिद्वयजनकत्वंपदयोर्विशेषणंजिज्ञासाद्
यमादायैवघटमानयतीत्यत्रक्रियाकारकपदमेवाकांक्षामुपपादयतिघटमितिपश्यतीयेतिजिज्ञासाभ
वतीत्यपिमेएतान्वयःइतिजिज्ञासात्रसंशयमूलाविशेषतःकिंचित्क्रियाविशेष्यकघटकर्मत्वान्वयबोधो
भवात्वितिजिज्ञासाघटमन्यत्राइतिजिज्ञासेतिघटमन्महेतिसंशयमूलःआनयनेविशेषतःकर्मत्वान्वय
बोधोभवत्वितीच्छैत्यर्थःभवतीतितथाचताद्दशताद्दशजिज्ञासाजनकक्रियाकारकोपस्थितिजनकतया

64

।क्रियाकारकपदमेवाकांक्षानिर्वाहइत्यर्थः ननु घटो नीलमित्यादावविषयः कर्मत्वमानयनं हन्ति
६४ रित्यादावपि अभेदान्वये कारकजिज्ञासाघटितानाकांक्षासत्त्वात्तथं नाभेदान्वयबोध इत्यत आह घटइ
ति अयोग्यत्वात् अभेदसंसर्गघटितयोग्यताविरहात् योग्यताभ्रमे तु भवत्येव शाब्दभ्रम इति भावः नना
भेदान्वययोग्यतासत्त्वात् द्वसक्रमभेदान्वयबोधे साकांक्षाविरहेणानारयति घटमिति घटकर्मकानयन
मिति भावः विशेष्यदलप्रयोजनमाह राजेति अयमेतीत्यादिः इति इत्यस्य पुत्रेणेति प्रथमोपस्थापितपु
त्रपदार्थेनेत्यर्थः न पुरुषमाकांक्षति न पुरुषपदसाकांक्षं राजपदं पुरुषे भेदेन स्वार्थान्वयबोधं जनयत्वि
ति तात्पर्यमिति तात्पर्यभ्रमात्पुत्रेणान्वयबोधे जनितेति राजपदस्य पुरुषान्वयबोधे साकांक्षत्वाद्वान
रवाक्यार्थबोधे जनितेपि महावाक्यार्थबोधेऽवान्तरवाक्यार्थबोधपदानां साकांक्षत्वात्तात्पर्यविषयत्वम राम॰
न्वयबोधविशेषणीयत्वेऽभयान्वयबोधे तात्पर्यं तत्रैकार्थेनान्वयबोधे जाते ऽपरान्वयबोधसाकांक्षतानि ६४

र्वाह्यपतात्पर्यविषयान्वयबोधानुपपत्तेर्न मुखे स्वतात्पर्यविषयतावच्छेदकयत्किंचिद्धर्मावच्छिन्नानुपपत्तेनं तंनि
वेशितं तत्र हरिरिति पदि घटः कर्मत्वमित्यादिपदेभ्यः घटकर्मत्वादयो विशृंखला उपस्थिताः इति न घटकर्मत्वाद्य
न्वयितया क्रियाविशेषादिजिज्ञासा तदेत्यर्थः नामविभक्त्यादीति घटमानयतीत्यादितः स्वरूपेणोपस्थितिरिति
प्रत्येकपदेभ्यः पृथक्पृथक्स्मृतिरित्यर्थः अन्वयप्रकारकजिज्ञासेति घटकर्मकान्वयप्रकारकक्रियाविशेषादि
तिज्ञासेत्यर्थः तत्र विशृंखलघटकर्मत्वाद्युपस्थितितो विना तादृशजिज्ञासास्वीकारे अतिप्रसंगमाह घट इति
न तु घटमानयतीत्यादिवाक्यस्य पदाधीनाविशृंखलतत्तदर्थोपस्थितिरपि घटः कर्मत्वमित्यादिपदाधीनोप
स्थितितो वैलक्षण्ये न उपस्थितिरिति दुर्वचत्वादिति भावः अत्र लक्षणे प्रत्ययपदाकांक्षानुपपत्तिरीदृश्यानि विभ
क्तिकघटादिपदो ह्यादिशो विभक्त्यर्थकर्मत्वादौ घटाद्यन्वयजिज्ञासानुदयान्न दोषांतरमाह त्रयाणामित्यर्थः रा
जपुत्रपुरुषाणामित्यर्थः त्रयमिति राजपुत्रान्वयबोधोत्पत्तिदशायामित्यर्थः यत्र इति तादृशाकारणविरहादि

65

६५ सार्थः तत्पूर्वमाजनितान्वयबोधत्वघटितायाप्रकृतान्वयबोधोपयिकाकांक्षायाः सत्वेनतात्पर्यादिविरहस्येव
तदन्वयबोधप्रयोजकत्वादितिभावः अथैवंप्रकृतान्वयबोधोत्तरंमणिटीकाकारमक्षणमाशंकात्तिद्धांतयतिधा
धातोर्भावणार्थकतयाभिधानपदंपयोराकांक्षासंगमनीयातदुभयपदाकापरंतस्यापर्यवसन्नंस्वचरितार्थ
ताप्रयुक्तशाब्दबोधरूपफलानुपधानमितियावत् तथातद्विशेष्यकतत्प्रकारकतत्संसर्गकशाब्दबोधेतादृशको
धाभावः तद्विशेष्यविशेषणपदयोराकांक्षेसार्थः पदस्यतज्ज्ञानस्यवाशाब्दबोधजननेआकांक्षायाः सहका
रितयातस्याः पदसंबंधतायापदस्याकांक्षात्वव्यवहारनिमित्ततानतुपदप्रस्यासत्तेर्जनयाशाब्दबोधजनकत्वेनलाघ
वादात्मनिष्ठप्रत्यासत्त्यैवशाब्दबोधेसमानविषयकशाब्दबोधाभावस्यहेतुत्वेनचपरस्परेणविनास्यार्थानुभाव
अग्नि कत्वेनतदपर्यवसानमितिर्मंथंथेनपदनिष्ठस्यान्वयानुभावकत्वंस्यापर्यवसानप्रिग्ररूपतावस्यतत्तस्यैवप्रकां एम•
तस्यतच्छब्दैनैवपरामर्शादात्मनिष्ठशाब्दबोधाभावस्याप्रकांतत्तयातदुपरामर्शात् तथाचात्मनिष्ठशाब्दबोधाभा ६५

वस्यापर्यवसानरूपत्वे विशेष इति वाच्यं पदनिष्ठान्वयबोधकत्वाभावो हिनान्वयबोधवर्तित्वघटितमदुपधाय
कत्वस्याभावः तथा सति शाब्दानुभवपूर्वकाले पदे तत्सत्वेन तदभावरूपकारणासत्वात् शाब्दबोधानुपपत्तेः परंतु
शाब्दबोधाभाव एव स एवात्मनिष्ठशाब्दबोधाभावपर्यवसित इति न च शाब्दबोधोपधानाभावः शाब्दबोधवैशि
ष्ट्याभावः स्वरूपयोग्यपदे चेदस्ति सहकारिपदान्तरविरहप्रयुक्तः तदा स्वरूपायोग्यपदेप्यस्तीति तादृश एवेत्यति
प्रसंगमिया फलोपधायकत्वाभाव एव पदान्तरव्यभिचारप्रयुक्तत्वेन निवेशनीयः फलोपधायकत्वस्य च फला
व्यवहितपूर्ववर्तित्वे सति तत्स्वरूपयोग्यत्वात्मकस्याभावः स्वरूपयोग्ये विशेष्यीभूततत्स्वरूपयोग्यताविरहप्रयुक्तः
इत्यतिप्रसंगानवकाशादिति वाच्यं तादृशाभावविवक्षणे पूर्वोक्तानुपपत्तेर्दुर्वारत्वात् तया स्वरूपयोग्यत्वसहित
फलवैशिष्ट्यरूपफलोपधानाभावविवक्षायेव स्वरूपयोग्येपदेऽतिप्रसंगस्य वारणीयतायात्तात् आत्मनोपि स
मवायित्वेन शाब्दबोधस्वरूपयोग्यतया स्वरूपयोग्यतासहितफलोपधानाभावस्य फलकालेऽसत्वेन फलाभावप

66

६६ र्यवसितत्वात् अत एव मिश्रोक्तमीदृशाकांक्षायामपि शाब्दबोधजागमाभावरूपत्वमपि संगच्छते शाब्दबोधोपधा
यकत्वाभावस्याकांक्षात्वे तदसंगतेः स्वरूपायोग्यपदस्याकांक्षत्वव्यवहारवारणाय पदविशेषनिष्ठत्वपर्यवसा
नपदार्थेंतर्भावयति यस्येति यस्य पदस्य सप्तम्यर्थे षष्ठी तथा च पदनिष्ठत्वार्थोन्वयानुभावकत्वं येन
पदेन विना पदव्यतिरेकप्रयुक्तं तस्येति तत्पदद्वयनिष्ठं रस्यार्थः तन्निरूक्तं प्रकृतान्वयानुभावकत्वं अपर्य
वसानं अभिधानापर्यवसानपदार्थः घटादिपदस्यामादिपदसहकारेण कर्मत्वादौ घटादेराधेयतासंसर्गबोधक
त तयान्निष्ठतादृशसंसर्गानुभावकत्वममादिपदव्यतिरेकप्रयुक्तं अमादिपदनिष्ठं च घटादिपदव्यतिरेकप्रयुक्तं
सहकार्यसमवधानकाले स्वरूपायोग्यनिष्ठस्य कार्यानुपधायकत्वस्य सहकारिविरहप्रयुक्तत्वादिति तत्र लक्ष
णासमन्वयः कर्मत्वादिपदस्य तादृशान्वयबोधायोग्यतया तादृग्विरहो न तादृशान्वयबोधकत्वस्य प्रयोजको न वा त राम.
न्निष्ठघटाभावे घटादिपदव्यतिरेकप्रयुक्तः अतो नातिप्रसंगः न चान्वयबोधानुभावकत्वस्यान्वयबोधाव्यवहि ६६

तथाघटत्वेन निर्वाहात्पान्वयबोधानुपधानरूपतया व्याख्यानात्· सोऽपि तत्काले सत्वात्किन्त्वफलानुपधानस्य स्वस्वावच्छि
न्नतथाघटत्वावच्छेदेन स्वव्यतिरेकेनाभिप्रयुक्तत्वात्तत्वस्यापि स्वसत्ताकांक्षतापत्तिरिति वाच्यं· इष्टत्वादत एव एकत्वा
न्तपदयोस्त्याप्ययोः कृतिवर्तमानत्वाद्योरन्वयनिर्वाहः अन्वयबोधविशेषपदविशेषज्ञानहेतुतायामावश्यकत्वे अ
न्यथा घटचित्सदस्य विरहोऽन्वयबोधविशेषानुपधाने प्रयोजकः कस्यचित्त्वएवं किंचित्सदनिष्ठतदनुपधानपदा
न्तरविरहः प्रयोजकः ननु सकलपदनिष्ठतदनुपधाने इत्यत्र नियामकाभावप्रसंगात्तावत्ते वच घटः कर्मत्वमित्या
दितो घटीयकर्मत्वाद्यबोधनिर्वाहेऽन्वयबोधानुपधानहेतुतायां निरुक्तपदविशेषीयत्वनिवेशनमफलमिति
ध्येयं पदज्ञापमानतया शाब्दबोधहेतुतामतेऽपि पदविरहेऽपि तथापार्यपदार्थोपस्थितिसत्वे शाब्दबोधोत्पत्तौ पदवि
रहो न तादृशशाब्दबोधानुपधानप्रयोजक इति पदजन्यपदार्थोपस्थितेर्हेतुत्वं विना स्वार्थान्वयानुभावकत्वमि
ति विवक्षणीयं पदस्मृतावप्यहेतुत्वेन पदस्थले तज्ज्ञाननिवेशनीयं पसदव्यक्तितानजन्योपस्थितेर्व्यातिरे

67

६७ कः तादृशोपस्थितेः तादृशोपस्थितिप्रयुक्तान्वयानुभावकत्वविरहात्तयोः पदयोः परस्पराकांक्षतोपपत्तये
यद्धर्मप्रकारकज्ञानजन्याया उपस्थितेर्यद्धर्मप्रकारकज्ञानजन्योपस्थितिं विनाऽन्वयानुभावकत्वं तद्धर्मा
वच्छिन्नपदयोः पर्यवसानं न विवक्षणीयं तादृशतादृशधर्मः आनुपूर्वीविशेषः घटपदं पटत्वादिकं तत्तद्धर्म
प्रकारकोपस्थितस्तात्र जन्यपदार्थोपस्थित्या च कदाचित्कदाचिदेकसत्वेऽपराभावात्कार्याभाव इति नानुपपत्तिः
एतेन कर्मत्वादिपदेऽम्पदत्वादिभ्रमजन्योर्थोपस्थितिकालेपि कर्मत्वादेर्घटादेराधेयत्वसंबंधबोधोदयात् अ
मादिपदैः स्वकर्मत्वादिपदत्वेन भ्रमादर्थोपस्थितोपि तद्बोधादमादिपदजन्यार्थोपस्थितेर्विरहे स्वप्रयोज
कत्वेपि न दोषः अथ अम्घटइत्यादिविपरीतानुपूर्वीज्ञानजन्यपदार्थोपस्थितेरन्वयबोधानुत्पत्त्या घटादिप
दाव्यवहितोत्तराम्पदत्वप्रकारकज्ञानजन्यार्थोपस्थितित्वेनैव शाब्दबोधहेतुतोपगमात्तद्रूपावच्छिन्नाभा
व एवान्वयबोधाभावप्रयोजको न त्वम्पदत्वादिप्रकारकज्ञानजन्योपस्थितित्वावच्छिन्नाभावः तेन रूपेण हेतु राम. ६७

त्वात्। विवक्षणीयं च तत्तद्धर्मप्रकारकज्ञानत्वावच्छिन्नाभावस्यैव प्रयोजकत्वं अन्यथा घटादिपदाव्यवहितोत्तरा
मपदत्वादिधर्मिपदधर्मपदेनोपादेयः न च घटपदाव्यवहितोत्तरम्पदत्वादिप्रकारकज्ञानजन्योपस्थितित्वा
वच्छिन्नाभावस्य शाब्दबोधानुपधानप्रयोजकत्वमादाय घटादिपदेनाव्यवहितोत्तरामादिपदस्याकांक्षामुपपा
दनीयं केवलामादिपदत्वावच्छिन्नस्याकांक्षा घटादिपदेनेत्यत एव एवं घटः कर्मत्वमित्यादिपदत्वप्रकारकोप
स्थितित्वावच्छिन्नाभावस्यान्वयानुपधानप्रयोजकत्वादमादिपदे घटादिपदनिरूपिताकांक्षाया अनिर्वाहे
ऽपि न क्षतिः अमादिपदे अमादिपदाव्यवहितपूर्ववृत्तिघटादिपदत्वावच्छिन्नस्याकांक्षाया उपगन्तव्यत्वादिति वाच्यं ए
वमग्रे। पिघटमित्याद्येकवाक्यान्तर्गतघटादिपदव्यक्तेरप्रदर्शनाद्वाक्यान्तर्गतामादिपदस्याकांक्षतापत्तेर्दुर्वारत्वात्
एतेन कर्मत्वादिविषयकशाब्दबोधे घटादिपदप्रकारकामादिपदत्वप्रकारकपदत्वाद्युपस्थितित्वेन एवं घटादि
विषयकशाब्दबोधे विध अमादिव्यवहितपूर्वत्वमन्तर्भाव्य घटपदत्वादिप्रकारकज्ञानजन्यपदार्थोपस्थितित्वे

68

नैवाम् घट इत्यादिवाक्याच्छाब्दबोधावारणायार्थविशेषमनंतर्भाव्य घटमित्यानुपूर्वीप्रकारकज्ञानत्वेन पृ
६८ थगेकैककारणताः कल्प्यते अप्पदत्वघटपदत्वादिप्रकारकज्ञानजन्योपस्थित्या शाब्दबोधजननेतादृशा
नुपूर्वीज्ञानस्य सहकारितोपगमेन विपरीतानुपूर्वीज्ञानाच्छाब्दबोधकारणत्वंभवात्तन्न च तादृशानुपूर्वी
ज्ञानस्य स्वतंत्रकारणताकल्पनापेक्षया पदार्थोपस्थितिकारणतायामेव तादृशानुपूर्वीज्ञानजन्यत्वनि
वेशनमुचितमिति वाच्यं प्रकृतेः प्रत्ययस्य च शक्यत्वस्याभेदेनार्थभूयस्त्वादर्थभेदेन पदार्थोपस्थितीनां व
हुतरकारणतापाम् पदप्रकृतिप्रत्ययानुपूर्वीज्ञानजन्यत्वनिवेशे एकैकमर्थमंतर्भाव्य एकैकप्रत्ययादिजं
न्योपस्थितेर्वैउविधप्रत्ययादिभेदेन कारणताभेदात्कारणताबाहुल्यप्रसंगात् प्रकृतिप्रत्ययानुपूर्वीज्ञानानां अर्थ
भेदान्निवेशपृथक्कारणताकल्पनस्यैवोचितत्वात् न घटोह्णंइत्यादिव्यभिचारवारणसंभवादिति घटपदाप्पदत्वादिप्रका ए.म.
रकज्ञानजन्योपस्थितित्वावच्छिन्नाभावस्यान्वयबोधानुपधानप्रयोजकत्वे तु रग्रहत्वमित्यतोपि न निमित्ताः उक्तातिप्रसंगस्य ६८

अस्य घट इत्यादौ साकांक्षत्वप्रसंगस्य दुर्वारत्वादत्राहुः पदविशेष्यकपदस्मृतिप्रयोजिका यादृशाया धर्मवत्का-
रकज्ञानत्वेन यादृशान्वयबोधहेतुता तत्स्वदस्मृतिप्रयोजिका तादृशधर्मपरत्वं तादृशान्वयबोधानुपधानसहितं
तादृशान्वयबोधोपाधिकत्वं साकांक्षत्वं चातो नादृशा धर्मः[illegible]प्रत्ययपदे प्रकृतिपदाव्यवहितोत्तरत्वप्रकृतौ
च प्रत्ययपदाव्यवहितपूर्वत्वं विनिगमनाविरहेणोभयज्ञानस्यैव शाब्दबोधहेतुत्वादेकतरज्ञानादपि शाब्दबो-
धोत्पत्तेरानुभविकत्वात् पापरत्वेऽनिरपेक्षयोः तज्ज्ञानयोः शाब्दबोधोपधायकताव्यभिचारवारणाय निरुक्तैवाकांक्षे-
वं घटपदादित्यादिहूंहूविभक्तेः पूर्वपदसाकांक्षतानुपपत्तिः एवमीं पिप्पलीमित्यादितस्तु हूं खेच पूर्वनिपाता-
ह्रीं दिपदसाकांक्षताविभक्तेर्नस्यात् उत्तरपदेन व्यवधानाभावस्याविवक्षितत्वान्नायं दोष इति वाच्यं नामत्वादेरु-
पस्थितिदशायां अपि शाब्दबोधोदयात् तादृशज्ञानस्य तद्धेतुत्वात् तस्य च तद्गुत्वे घटपदानयतीत्यत्र घटादिप-
दशक्तिग्रहाभावात् न योग्यतादिज्ञानविरहाद्वा पदार्थान्वयः तत्रापि कर्मत्वादौ घटान्वयबोधप्रसंगात् न हि हूं हू

69

६९

स्थले समासांगतैकपदार्थेनान्वयेऽपरपदार्थान्वयं कश्चिदभ्युपैति एवं राजपुरुषं पश्यतीत्यादौ तत्पुरुषेऽपि पूर्व
पदार्थस्य राजादेर्विभक्त्यर्थेऽन्वयादिति चेन्न समासस्थले समासाव्यवहितोत्तरत्वस्यैव प्रत्ययं समासघटकतत
स्य तदाकांक्षात्वोपगमात् तज्ज्ञानस्यैव प्रत्ययार्थेन तत्पदार्थान्वयबोधहेतुत्वात् राजपुरुषमित्यादितत्पुरुषस्य
ले पूर्वपदस्येतरविशेषणत्वेन स्वार्थपरतया गृहीतत्वात् तद्दर्थेन विभक्त्यर्थान्वयः द्वंद्वसमासस्थले समासघटकैक
पदार्थेन विभक्त्यर्थान्वयबोधे अपरपदार्थान्वयसामग्र्या अपेक्षणीयतया नोक्तातिप्रसंगः प्रकृतिप्रत्यययोर्भावो
यत्र नास्ति तत्र तत्पदार्थान्वयबोधे तत्तत्पदयोरेकधर्मिकापरपदसमभिव्याहारज्ञानस्य हेतुतया तत्पदसमभि
व्याहार एव तत्तत्पदाकांक्षा अतो नाविभिन्नवाक्यांतर्गतपदयोराकांक्षा समभिव्याहारस्य परस्परेणान्वयबो
धकतामिप्रायविषयत्वं उद्देश्यविधेयभावेनान्वयबोधे समभिव्याहारयत्सौर्वापर्यमप्याकांक्षा अत एव यत्रो
द्देश्यत्वं च कपदपूर्वं विधेयवाचकपदस्य कारोत्ययमेवेत्यादौ नाकांक्षेति विधेयाविमर्शनं दोषः एतासामाकां

रम. ६९

स्मरणं विशिष्टाविशिष्यतादृशरूपेण ज्ञानं हेतुः ननु निराकांक्षाव्यवहारविषयतावच्छेदकरूपेणावि
शेषरूपेण हेतुतया आवश्यकतया शाब्दानुभवजनकतावच्छेदकप्रकारताश्रयवृत्तित्वेनउक्तज्ञानहेतु
तायं मानाभावात् विशेषरूपेण हेतुताया आवश्यकत्वे वानुपूर्व्यादीनां विशेषतः संदेहे विपरीतज्ञाने च
शाब्दबोधाहेतुतानुपपत्तेः घटमानयेति चेन्न इत्यादौ घटादिपदैरयादिपदानां परस्परकांक्षासत्वेपि पपारप
त्ति नामेति नामपदं प्रातिपदिकं घटादिपदं अमविभक्तिपदं अमादिरूपविभक्तिपदं धातुपदं नीप्रभृतिः आ
ख्यातपदं तिवादिः क्रियापदं आनयतीत्यादिः आख्यातान्तसमुदायः कारकपदं घटमित्यादिः सुवन्तसमुदायः
एतेषां नामरूपोरूपधातोः धात्वाख्यातयोः क्रियावाचकपदयोरितियावत् परस्परं विना परस्परव्यतिरे
कप्रयुक्तेः परस्परस्परस्परोपास्थितेर्न स्वार्थानुभावकत्वं परस्परार्थान्वयानुभावकत्वाभावे अनन्तत्तत्वस्द
द्वयस्य मिथः साकांक्षत्वे इति शेषः ननु समानविभक्तिकयोर्नीलघटादिरूपविशेषणविशेष्यपदयोरप्याकांक्षा

70

७०

याभावरूपकत्वं अन्यथा नीलघटयोर्विशेषणविशेष्यभावेनान्वयबोधानुपपत्तेरिति कथं नामपदेन प्र
त्ययपदस्याकांक्षाग्रहीतेत्याकांक्षायां परमते नीलघटयोर्विशेष्यविशेषणभावेनान्वयबोधो न भवत्वे
वातो नामपदयोराकांक्षाविरहेपि न क्षतिः स्वमतेपि तयोर्भेदेनान्वयेनाकांक्षा अपि तु पदस्य धर्मिपरतया
तदर्थधर्मिणि घटादावभेदेन विशेषणतास्वीकारादन्वयबोध एवाकांक्षा नामादिपदानां विभक्त्यादिमा
त्रेण साकांक्षत्वे च तदन्वयाभिप्रायेणाभिहितमित्याह परमत इत्यादि परो मीमांसकः इत्यादिना आरुणया
गवेत्यादिपरिग्रहः नामार्थादीनां नीलादीनां कारकाणां च घटादीनां नचाख्याते इवोभयत्रापि अन्वये
समानविभक्तिकपदयोः साकांक्षतायामपि तादृशान्वयबोधोपगमेन संभवात्तादृशान्वयबोधः परैर्नोपेयत इ
त्यत आह विशेषान्वितेति विशेषणपदोत्तरं विभक्तेर्योर्थः तदनन्वयेन तादृशविभक्तेरसाधुत्वापत्तेरित्यर्थः क एम॰ ७०
र्मत्वाद्यर्थ एव द्वितीयादेरनुशिष्टत्वादित्यर्थः यद्यपि नीलो घट इत्यादौ नीलादेः स्वोत्तरेण क्रियान्वयवादि

मीमांसकमते किंचाविशेष्यतयातदन्वयात्प्रथमायाः कर्तृत्वं नार्थः तथापि संसर्गबोधकतयान्तस्तार्थकं न च विशेषणा
विशेष्यभावेन नीलघटयोरन्वये पि नीलादिपदोत्तरप्रथमाया नीलाद्यन्वितसंसर्गबोधकत्वमुपेयत इति तन्मते पि
नस्तार्थकत्वस्योपपत्तिरिति वाच्यं घटपदोत्तरप्रथमाया घटैकत्वादिबोधेन तत्तत्स्वार्थतया घटनिष्ठाभेदप्रतियोगिनि
नीलेप्येकत्वलाभात्तत्रैकत्वादिबोधोपगमस्यार्थ्यो न रु त्वपश्चात्त्वत्वामन्न च परमतेपि नीलघटपदयोरभेदबोधस्यो
त्तरकालिकतया घटैकत्वलाभान्नीलेप्येकत्वलाभो भवतीति नीलपदोत्तरविभक्तेरेकत्वपरता न संभवतीति वाच्यं नील
पदोत्तरविभक्तेरेकत्वपरतायामेव विभक्तिद्वयस्य विशेषणविशेष्यभिन्नैकत्वपरतायालाघवेनानिश्चयात्तदन्वयानुपप
त्ताधर्मिणोरभेदलाभसंभवेन तदुपयोगितयाविशेषणान्वितविभक्तेरेकत्वपरतायाः औचित्यात् एवं नीलोस्ति घटोस्ति
त्यतो यथा वाक्यार्थद्वयबोधः तथा तत्स्थलकृत्तसामग्रीद्वयान्नीलोस्ति घटोस्तीत्यत्रापि वाक्यार्थद्वयबोधः न तत्स्थलकृत्त
सामग्रीद्वयान्नीलोस्ति घटोस्तीत्यादावपि वाक्यार्थद्वयबोधस्वीकारसंभवान्नीलपदघटपदयोः परस्पराकांक्षाघटितसामग्र

71

७१

त्वं तत्सम्बन्धित्वात्तदर्थयोर्विशेषणविशेष्यभावेनान्वयबोधकत्वमप्रसक्तमिति वाच्यं न विशिष्टवैशिष्ट्येनान्वयबो
धइति नीलादिविशेषितघटादौ क्रियान्वयबोधइत्यर्थः अपितु नीलोक्तिघटोक्तीनीलमानय घटमानयेत्यादिवी
त्यार्थद्वय एवेति शेषः अत एवं तादृशवाक्यस्य नीलपटादौ पीतघटादौ च प्रवृत्तिः स्यात् एवमरुणया गवा सोमं
क्रीणातीत्यादौ आरुण्यपदस्य गवा अरुणपटादीनां च सोमक्रयणांशस्यार्थः स्यादित्यत आह किंत्विति समानः नी
लघटयोः परस्परसंवलनेन बोधः आर्थः अर्थाधीनः अर्थप्रतिरूपो न त्वालिक इतियावत् अयमाशयः एकजाती
यविभक्त्यावभिन्नोक्तत्वाभिन्नकर्मत्वादिपरतापालाघवेन लक्षणानैचित्यात् द्रव्यपरत्वे क्रयणसाधनत्वेनैकद्रव्य
त्वाभेसाधनत्वेनद्रव्यांतरान्वये आकांक्षानुपपत्तेरपि द्रव्यपरत्वासंभवात् गुणपरत्वे तु गुणस्याव्यक्रयणस्यक्रयसा
धनत्वेन विधाने तस्य धर्मिभूतद्रव्यमंतरेणाहत्येव साधनत्वमिति प्रतिसंधानात् किं द्रव्यमंतरेणाहत्य साधनत्वमित्याकां
क्षोदयात्तया अयणो द्वाराक्रयसाधनत्वमित्येतद्गोप्ये गवेत्यनेन गोः क्रयसाधनत्वेनविधानानुपपत्तिः गोद्वारारुण्य

रम.

७१

स्वरूपसाधनत्वं च गोणत्वं विनानुपपन्नमिति तद्विशेषणत्वलाभः तदुक्तं तृतीययागुणस्यैव करणत्वं स्व
यं प्रति विसृष्टं गम्यते न तु द्रव्यद्वारैव पुंस्त्वमनर्थ इति न चाकृत्यायेस्य गुणपरत्वे स्त्रीलिंगतानुपपत्तिः गुणिद्वारा गु
णस्य करणतया गुणिनो विकरणत्वज्ञानस्यैव गुणिपरतया तदुपपत्तेः अत एव जातिप्रकारेण धर्मिबोधकग
वादिपदानां मत्वर्थलक्षणेति यथाजातावेव शक्तिः तस्याः आश्रयद्वारा कर्मत्वाद्यन्वयः अनंतरमाक्षेपाद्यकैः कर्मत्वलाभः
तथा गुणादिप्रकारेण बोधकानां शुक्लादिपदानां वैयाकरणोपालंकारिकैर्गुणादौ तद्वज्जातौ वा शक्तिरेव
तत्र क्रियाकर्मत्वाद्यन्वय इति द्रव्यस्याक्षेपतो लाभ इत्युच्यते तदुक्तं तकेति न स्वतुर्भेदो जात्यादिर्जातिरेव वेति एवं च
तन्मतेऽकृत्यादिगुणान्वयत्वावच्छिन्नलिंगान्तरं परित्यज्य उपपद्यते अस्माकं नैयायिकानां लाभेदानुभावबलाद्भेदा
नुभवानुरोधात् न न चाभेदस्यार्थतो लाभस्तं भवात्कथं तदनुरोधात् द्वेदः शाब्दधीविषय इति वाच्यं विभक्तिरूपस्यैकाक
र्मत्वादिप्रत्ययानिश्चयं विनाऽपि तयोरभेदबोधस्यानुभविकत्वात् संसर्गतानिसंसर्गतयाशाब्दबोधविषयत्वस्यार्थः त

थाचतत्तुपस्थापकपदाभावेपिनक्षतिरितिभावः नन्वेवं विभक्तेर्वैयर्थ्यमत आह विभक्तिरिति विशेषण
पदोत्तरविभक्तिरित्यर्थः साधुत्वार्थं अभेदान्वयबोधोपयिकाकांक्षानिर्वाहार्थमित्यर्थः असमासे समा
नविभक्तिकपदयोः समभिव्याहारस्याभेदान्वयबोधोपयिकत्वादिति भावः अथवा प्रकृतिभूतनामपदस्य
निर्विभक्तिकत्वेऽसाधुत्वात्साधुत्वार्थमिति यथाश्रुतार्थत्वादिति भावः अथवा प्रकृतिभूतनामपदस्य नि
र्विभक्तिकत्वेऽसाधुत्वात्साधुत्वार्थमिति यथाश्रुतार्थकमेव एतेन समासानुरोधाद्विरूद्धविभक्तिराहित्यस्य
विशेषणपदनिष्ठविशेष्यपदाप्रकृतिकविभक्त्यप्रकृतित्वरूपस्यैवाभेदान्वयबोधौपयिकाकांक्षानिर्वाह
कत्वस्वीकारे विशेषणविभक्तिप्रकृतित्वं च विभक्तिरूर्ध्वत्वेन प्रतिसंधीयमानत्वं तेन शोभनं दधीत्यादौ वि
शेष्योत्तरविभक्त्यसत्वेप्यनुसंधीयमानप्रथमायास्तत्प्रकृतित्वं रूपवान् घट इत्यादौ विशेषणपदस्य च विशे राम ७२
ष्यवाचकपदाप्रकृतिकानुसंधीयमानप्रथमाप्रकृतित्वमुपपद्यते न चैवमपि विशेषणविशेष्यपदयोः सर्व

ऽभिन्नविभक्तिप्रकृतिकतयाविरुद्धविभक्तिराहित्यसमभिव्याहारस्थले दृष्टं विशेष्यपदप्रकृतिकेत्यनेन विशेष्य
पदप्रकृतिकविभक्तिविजातीयत्वविवक्षणे च नीलघटरूपमित्यादौ विशेष्यवाचकघटपदप्रकृतिकविभक्त्यप्रसि
द्ध्याऽनुपपत्तिरिति वाच्यं विशेष्यवाचकपदाप्रकृतिकेत्यनेन तादृशपदाव्यवहितोत्तरत्वेनानुसंधीयमानावृत्तिवि
भक्तिकधर्मवत्त्वस्य विवक्षया सामञ्जस्यात् व्युत्पत्तौ समासस्थले समानविभक्तिकत्वमेवाभेदबोधे तन्त्रं न तु निरुक्ता
नुगतं रूपं तथा सति घटो नीलेत्यादेः पीतघटादौ नीलाद्यभेदान्वयापत्तेः समासस्थलानुरोधेन च विशेषणविशेष्यपद
योः अव्यवहितपूर्वापरभाववत्त्वस्येव तन्त्रत्वं न च द्वितीयादिविभक्तेः कर्मताद्यभावे तत्साधुतापत्तिरिव कर्मादि
द्वितीयेत्यनुशासनादिति कथं विशेषणविभक्तेर्निरर्थकत्वोपगम इति वाच्यं विशेषणविभक्तेर्निरर्थकत्वेपि विशे
षणपदस्य विशेष्यपदसमानविभक्तिकत्वानुशासनवशेन साधुत्वसंभवात् न चारुणया गवेत्यत्र गव्यरुणाभेदा
न्वयबोधोपगमे तत्तदभेदविधानात्क्रयसाधनतया विधेयभूताया गोरनुवाद्यतया विधेयत्वानुवाद्यत्वविरुद्धोपस ८१

73

७३

समावेशः तदुभयविरोधस्योद्भूततया भासमान एव विधेयतया भासत इत्यस्य च प्रदर्शितत्वात् इति तन्त्रवाक्याभेद
एव साधीयानिति वाच्यम् अखण्डतया अभेदेन विधानेपि साधनाकांक्षायां साधनतया विशिष्टयागे विधानेनैव समी
हितसिद्धेः विशेषणविभक्तेः अर्थबोधकत्वमपि संभवतीत्याशयेनाह यद्वेति समानविभक्तिकयोः समानविभक्ति
कपदोपस्थाप्ययोः अभेदार्थकत्वमिति तथा च नीलघटमित्राभेदः प्रकारतया घटादौ भासत इति भावः ननु अभेदं
वाच्यमित्यादौ वाच्यत्वावच्छिन्नाप्रसिद्ध्या तदभेदाप्रसिद्धेः अभेदार्थकत्वं विभक्तेर्न संभवति तत्र तद्व्यक्तित्वावच्छिन्न
भेदाभावस्यैव तत्तद्व्यक्तिविशेषणतया भानेऽपि अभेदेन तद्व्यक्तित्वावच्छिन्नान्वयेनैव निर्वहति स च तेन रूपेणाविशेष
णादनुपस्थितत्वान्न संभवति विशेषणतावच्छेदकाश्रयप्रतियोगिकभेदाभावस्य च प्रतियोगिप्रसिद्धावपि न प्रसि
द्धिः वाच्यत्वाश्रयप्रतियोगिकभेदस्य सर्वत्र सत्त्वात् तादृशभेदप्रतियोगिताकाभावः प्रसिद्ध इति चेत् न सामान्यावच्छे राम
कतया परः कम्बुग्रीवादिमत्त्वादेर्योग्यतापन्निरिति मेवं अभेदस्य संसर्गतापक्षेपि एतद्दोषसंभवात् न च तत्र ७३

द्व्यक्तित्वावच्छिन्नभेदाभावस्य तत्तद्व्यक्तौ तत्तद्व्यक्तिसंसर्गतयाभानं संभवति संसर्गघटकतत्तद्व्यक्तित्वानुपस्थि
तावपि तद्भानसंभवादिति वाच्यं संसर्गतात्पर्यज्ञानस्य शाब्दबोधस्य हेतुतया तत्तद्व्यक्तित्वानुपस्थितावपि संसर्ग
घटकतयापि भानासंभवात् तस्माद्भेदोत्र न भेदाभावः अपितु तद्व्यक्तित्वविशिष्टधर्म एव तद्भेदः तस्य च संसर्ग
तयैव प्रकारतयाभानं निःप्रत्यूहं अभेदप्रतियोगितयाभासमानव्यक्तीनां विशेषणतावच्छेदकीभूतोपस्थि
तिरूपेणैव भानोपगमात् तत्तद्व्यक्तित्वेनोपस्थितैकवृत्तिविशेषणतावच्छेदकादिधर्मस्य तद्व्यक्तित्वविशिष्टस्य ६
स्यत्रासत्त्वाद्भिन्नरूपेणोक्तरूपेण वा विभिन्नव्यक्तिद्वयपरसमानविभक्तिकपदयोर्न योग्यतात्राकाशो द्वावित्यादौ
द्वित्वेन भासमानस्याकाशस्य निरुक्तभेदो यद्यप्याकाशेऽस्ति तथापि तेन रूपेण भासमानव्यक्त्यन्तरस्यापि तत्राभे
द्वित्व दभानात्तस्य बाधितत्वेन तद्व्यक्त्यस्य योग्यता न च तदंतरस्य रूपेण यत्र द्वित्वभानं तत्रैव योग्यताप्रसंग इति वाच्यं
पर्याप्तिसंबंधेन द्वित्वादिव्यासज्यवृत्तिधर्मप्रकारेण यत्रैव व्यक्तिमात्रे न व्यक्तिभानं तादृशानुद्देश्यत्वमात्रात्तज्ज्ञान

74

क्तवाक्यस्य योग्यत्वापत्तेः यत्र व्यासज्यवृत्तिधर्मस्य विशेषणताऽवच्छेदकता तत्र तदवच्छिन्नभेदाभाव एवाभे
७४ दविशेष्ये भासते स च तादृशधर्म एव तस्य च विशेष्यताऽवच्छेदकावच्छेदेनैवान्वयात् एकमात्रवृत्तिधर्मस्य च
व्यासज्यवृत्तिधर्माधिकरणतानवच्छेदकत्वादाकाशत्वादेर्वाधिकरणद्वित्वावच्छिन्नाधिकरणत्वावगाहने नाका
शौ द्वावित्यादिवाक्यजन्यबुद्धेर्भ्रमत्वनिर्वाह इत्याहुः एतन्मते घटो न नील इत्यादेः न निरुक्ताभेदाभाव एव प्रत्याय्य
व ते इति संसर्गाभाव एव नञर्थः समासस्थले वाभेदः संसर्गस्तथैव भासते तदर्थकविभक्तिविरहात् मतद्वय एव नी
लो घट इत्यादौ समानविभक्तिकपदयोरभेदविषयकत्वान्वयबोधस्याकांक्षानुपपादपतिश्चत इति समानविभ
क्तिकपदोत्तरभेदानुभवयोग्यत्वादित्यर्थः विशेषणविशेष्यभावानुभावकत्वमिति विभक्त्यर्थद्वारा अभेदसं
बंधेन समासाद्वा नीलघटाद्योर्विशेषणविशेष्यभावेन अनुभावकत्वमित्यर्थः तत्पदयोः तादृशनीलघटादि राम॰
पदयोः परस्परं विना न तादृशपदयोः तादृशान्वयानुभावकत्वाभावः परस्परव्यतिरेकप्रयुक्त इति समुदायार्थः ७४

अथ विभक्त्यर्थाभेदनिवेशे मतेन तद्व्ये विशेष्यपदस्य विशेषणपदसमानविभक्तिकत्वं नापेक्षते राहोः
शिरः चैत्रेण धनमित्यादौ षष्ठीतृतीयार्थाभेदस्य प्रथमान्तपदार्थेऽन्वयात् तथा च नीलो घट इत्यादाविव नीलं
घट इत्यादावपि द्वितीयार्थाभेदस्य घटादावन्वयप्रसंग इति चेत् अभेदसंसर्गतामते तत्संसर्गकबोधे समा
नातिरिक्तस्थले समानविभक्तिकयोरेवाकांक्षा विभक्त्यर्थाभेदमते च तृतीयाषष्ठ्यामिव विभक्त्यन्तरेणाभे
दबोधनेऽपि समानविभक्तिकेनैवासमानविभक्तिकेनापि पदेन तदाकांक्षा परं तु षष्ठीतृतीयातिरिक्तविभक्तेः
सजातीयविभक्तिरहिततद्विशेष्यपदसमभिव्याहारे साधुता अनुशासनाविरुद्धत्वात् अतो नीलं घट इत्याद
यो न प्रयोगः ननु एवं षष्ठीतृतीययोरपि साधुता तज्जातीयविभक्तिरहितविशेष्यपदयोगे न स्यात् विशेष्यविशे
षणपदयोः समानविभक्तिकत्वानुशासनविरोध इति वाच्यं विशेष्यपदे षष्ठ्यादेरसत्वेऽपि विशेषणपदोत्तरं ष
ष्ठेस्तत्र प्रयोगात् अतस्तत्साधितार्थविधायकानुशासनस्य फलस्वनीयत्वात् मीमांसकमते द्वारमित्युक्ते अध्याहृतपि

75
७५

ध्यानादिना व्यतिरेकमर्त्वान्वयबोधात् विधानोपस्थापकपदाभावेऽपि तदुपस्थापकानुमानादिनाप्युक्तपदस्या
कांक्षेति येनेत्यत्र पदत्वाविवक्षाभिप्रायेणादर्शयति व्यामिति अध्याहारं विना विधानोपस्थापकानुमाना
दिव्यतिरेकप्रयुक्तं योर्थान्वयानुभावकत्वमुक्तपदस्य स्वार्थान्वयबोधकत्वाभावेनुत्वमिति तदा तदाकांक्षे
त्यभिमेणान्वयः अतः उक्तपदेन तदाकांक्षेत्यर्थः अनुमानादिविरहस्यान्वयबोधप्रयोजकत्वहेतुतयाऽ
प्रतियोग्युपलम्भादिति अत्राप्यध्याहारं विनेति काकाक्षिन्यायेन संबध्यते तथा चानुमानादिकं विना अन्वय
प्रतियोगिविधानाद्यनुपस्थितेरित्यर्थः तथा विधानोपस्थापकानुमानादेः शाब्दबोधाजनकत्वेऽपि तज्ज्ञानकान्वय
प्रतियोग्युपस्थितिजनकत्वेन तदुपयोगितया तद्व्यतिरेकस्यान्वयानुपधानप्रयोजकत्वमव्याहतमिति भावः अनुमाना
देरन्वयानुभवाजनकतया तस्यानुपधानं स्वभावत एवेति तत्र उक्तपदाकांक्षाविरहेऽपि न क्षतिः अनुभवजनकपदनिष्ठा राम०
कांक्षाया एव शाब्दबोधोपयोगित्वादित्याशयेन पदे एवाकांक्षासत्वमुपपादितं तदपि यथाश्रुताभिप्रायेण यदि च यस्येति ७५

यत्संदंष्यत्राकांक्षासत्वं तत्स्वरूपं तदुपस्थितिपर्यवसानमपि तज्जन्योपस्थितिपर्यन्तं तदापर्यन्ते ऽनुमानादिजन्यार्थोपस्थितेर्विशा
ब्दबोधजनकतया तन्निष्ठं तद्जनकत्वसहकारित्वविरहप्रयुक्तमिति विधानोपस्थापकानुमानेपि पदाकांक्षा उपपद्यते इत्य
वधेयं लौकिकस्थले ऽत्र अभ्याहृतार्थान्वयबोधप्रयोजकबोधोपयिकाकांक्षा श्रुतपदेमध्यपर्यन्ता वेदस्थलेपि तत्र तां समर्थ
यति विश्वजितेतिमयेदं कार्यमिति विश्वजिद्यागः स्वर्गकामस्य कार्य इत्यर्थः इति इत्याकारकं ज्ञानं नाधिकारित्वं विनोति स्वाधिकारित्वे
नान्वयप्रतियोगिनः स्वर्गकामस्य उपस्थापकमनुमानादिकं विनाज्ञानानुपधायकत्वं श्रुतपदस्येत्यर्थः तदाकांक्षाश्रुतपदेनादृशा
नुमानाकांक्षा स्वर्गकामत्वेनाधिकारिणो बोधेपि न साक्षात्प्रवर्तकः स्वकर्तव्यताज्ञानस्यैव प्रवर्तकत्वात् तादृशाज्ञानं न शाब्दबोध
रूपं प्रवर्तनीयमुद्रूपाणां विशेषतो विधिप्रत्यार्थे तत्र्धर्मा वेवाश्रमेदादिप्रसंगात् तथा च स्वर्गकामत्वेनाप्यधिकारिणो ऽनुमाना
देव बोधो भवतु किं तस्यानुमानोपस्थितस्य शाब्दबोधोपयोगमेवेत्याशयेनाह यद्वेति कर्त्रादिवेतिपचतीत्यादावित्यादिः दृष्टान्तोयमन्या
यमते कर्तृगाचकसुत्तानस्यानुभावकत्वपक्षे गोर्वाहीकः गंगायां घोष इत्यादौ गोगंगादिपदलाक्षणिकगंगादिपद

76

७६ योनज्ज्ञानस्य च त्वभावतोऽननुभावकतयापस्येतिपक्षद्वयस्य लक्ष्यपदपरत्वे तज्ज्ञानपरत्वे च नाकांक्षावत्त्वं निर्वहतीति
गोण्णादिपदजन्योपस्थितिसहकारेणानदर्थान्वितस्वार्थाननुभावकसमभिव्याहृतशक्तपदेतरपदसाकांक्षत्वं तदेव
शाब्दबोधोपयोगीत्याशयेन दर्शयति गोणोतिपन्मते शक्तिरनुभवजनकतावच्छेदिका सैव च वृत्तिस्तन्मते गोण्णादेरनु
भवजनकतावच्छेदकशक्तिविरहेणाननुभवजनकत्वसंभव इति अननुभविकत्वं यन्मते च शक्तिर्न जनकतावच्छेदिका
अपि तु पदत्वं तज्ज्ञानत्वं वा पन्मते शक्तिरेव कारणतावच्छेदिका वृत्तिलक्षणान्तरं तन्मते अवाचकादवृत्तिरूपशक्तिवि
रहेपि शाब्दानुभावजनकत्वेन विचारसहमिति पक्षद्वस्फुक्ततदुपस्थापितस्य गोण्णादिपदोपस्थापितार्थस्याननुभावक
त्वे अननुभावकत्वाभावो वाचकपदेतरपदं विना गोण्णादिपदव्यतिरेकप्रयुक्त इत्यर्थः अध्याहृतस्य वेति अथ अध्या
हृतार्थविषयकानुभवजनकत्वाभावः श्रुतपदेऽध्याहारविरहप्रयुक्त इत्यर्थः ननु समानविभक्तिकनामपदयोरभेदा रा म
त न्वये पदद्विसाकांक्षतातदानीलो घट इत्यादौ घटः कर्मत्वमित्यादितोऽपि अभेदान्वयो भवत्वित्यत आह सजातीयेऽन्वय ७६

दर्शनमिति विशेष्यसजातीये विशेषणसजातीयस्यान्वयदर्शने दृश्यमानोऽन्वयः प्रकृतसंसर्गः योग्यता तद्विशेष्ये
तद्विशेषणस्य तेन संबंधे नान्वयबोधोपयिकयोग्यतेत्यर्थः पयसासिंचतीत्यादौ सेकत्वादिना सेकादिसजातीये पयः
कारणकत्वादिना पयःकरणकत्वादिसजातीयस्य अन्वयत्वादिसंसर्गस्य सत्त्वात् योग्यतानिर्वाहः वह्निना सिंचतीत्या
दौ क्वचिदपि सेकादौ कस्यचिदपि वह्न्यादिकरणकत्वस्य संसर्गासत्त्वादयोग्यता योग्यतायाः स्वरूपसत्त्वान शाब्दबो
धोपयोगिता अयोग्येऽपि योग्यताभ्रमाच्छाब्दबोधोदयात् योग्येऽपि अयोग्यताभ्रमदशायां योग्यताज्ञानाभावेन शाब्दबोधा
नुदयात् अपि तु अयमाशयः एवं तथात्वमेतस्याभाये दर्शनाभिधानं ज्ञानं च कारणतावच्छेदकतया आधिकरणतया
वा अन्वयबोधे उपयुज्यते विशेष्यविशेषणसजातीयत्वं विशेष्यताविशेषणतावच्छेदकावच्छिन्नत्वं तन्निवेशात् पयव्यक्तेः
पयव्यक्तिसजातीयस्य वायव्यक्तिसजातीये वायव्यक्तेः संबंधो न गृहीतः तत्रापि तच्छाब्दबोधोपपत्तिः विशेष्यतावच्छेद
कावच्छिन्ने विशेषणतावच्छेदकावच्छिन्नस्य संसर्गग्रहदशायां तत्तद्व्यक्तित्वादिना तयोः संसर्गग्रहः विषयत्वेन वा शाब्दबो

77

धापत्तिः तथा च तद्धर्मावच्छिन्नविशेष्यकतद्धर्मावच्छिन्नप्रकारकतत्संसर्गकयथार्थबोधे तादृशज्ञानं हेतुरिति पर्यवसितं
७७ विशेष्ये विशेषणं विशिष्य निवेश्य तद्विशेष्यसद्विशेष्यसजातीये तद्विशेषणसजातीयस्य प्रकारतत्संसर्गकज्ञानं तादृ
शज्ञानं हेतुर्नोपेयते साजात्यघटकविशेष्यतावच्छेदकादेर्विशिष्य निवेशासावश्यकतो तद्विशेष्यादिनिष्ठत्वेन तत्तद्धर्मावगा
हिज्ञानत्वेन हेतुतायां बहुतरकार्यकारणभावाधिक्यादवच्छेदकगौरवात् गुर्वी गृहीतविशेष्यव्यक्तौ तादृशविशेषणव्यक्तेः
य शाब्दबोधानुपपत्तेश्च यत्र विशेषणतावच्छेदकावच्छिन्नस्यान्वयो भूतः विशेष्ये तत्सजातीयत्वे योग्यतेति सांप्रदायिका व्याचक्षते तन्न
तथा सति विशेष्यतावच्छेदकावच्छिन्ने विशेषणतासंसर्गग्रहदशायां रूपान्तरावच्छिन्ने विशेष्ये विशेष्यतावच्छेदकरूपावच्छिन्नेऽपि च
विशेषणसंसर्गजातीयत्वस्य ग्रहसंभवात् शाब्दबोधापत्तेः यदि च तद्धर्मावच्छिन्ने तदसंसर्गग्रहदशायां तद्धर्मे तद्वृत्तित्वाग्रहेणावि
शेषणावद्वृत्तितद्धर्मवत्त्वरूपविशेषणावज्ञानीयत्वानुपपत्तिरित्युच्यते तदापि गौरवं दुर्वारमेव तादृशयोग्यतापेक्षया विशेष्य राम
तावच्छेदके विशेषणावद्वृत्तित्वविशेष्यतावच्छेदकवति विशेषणवत्त्वस्य च लघुत्वात् अपूर्वविशेषणविशेष्ययोः शाब्दसंसर्गबो ७७

धानुपपत्तेर्यथा श्रुतसाजात्यघटकं रूपं विशेषणोऽनिविष्टं निविष्टं अतिरिक्तत्वात्कद्यमेव दूषयति यथा कथं
चित्साजात्यस्येति येन केनापि रूपेण साजात्यस्येत्यर्थः अव्यावर्तकत्वादिति वह्नित्वानाश्रितेः तसाध्ययोग्यप्लेपिप्र स्य
मेयत्वादिनावह्निकरणकत्वामहादिसजातीयत्वस्यैकादौ तेनरूपेणैकादिसजातीयत्वस्य च महादृशहादौ ८
सत्वेनायोग्येऽतिप्रसंगवारकत्वादित्यर्थः पदार्थतावच्छेदकेनेति अन्वयितावच्छेदकरूपेणेत्यर्थः अन्यजातइति
जातत्वावच्छिन्नेऽन्यतः स्वभिन्नेवयपयःपानकर्तृतादर्शनेनतंभवेनान्येनेत्युक्तं अभावादिति अन्वयितावच्छेदकान्य
जातत्वावच्छिन्नेपयःपानकर्तृकत्वसंसर्गेण दृष्टः तादृशाचेत्तत्रयवच्छिन्नस्यतत्त्वाच्चान्यजातइतितेन चैत्रत्वादिरूपमन्यजा
तत्वं पदार्थतावच्छेदकमेवेति उक्तावपि नप्रतीकाः यत्रपदार्थतावच्छेदकं भूतलत्वादिकमेव घटादिविशेषणा
न्वयितावच्छेदकं तत्राप्युक्तयोग्यतानिश्चयस्य शाब्दबोधात्पूर्वं नियमतोदुर्घटत्वात् अन्यथा योग्यताज्ञानादेरपि प्रवृत्त्यादि
कार्यनिर्वाहे शाब्दप्रामाण्यं विनोपपत्तेरित्याहुः वाक्यार्थस्येति विशेष्यतावच्छिन्नेविशेषणतावच्छेदकावच्छिन्नवत्त्व

78

७८

स्यस्यार्थः अपूर्वत्वान्न शाब्दबोधात्पूर्वं नियमतो निश्चयसंभावात् एतद्दूषणं मुक्तयोग्यतायां निश्चयो हेतुश्चे
दुच्यते तदभिप्रायेण संशयसाधारणतज्ज्ञानहेतुत्वोपगमे पुनः तत्केवलयोग्यतानसाधीयसीति बोध्यं समभिव्या
हृतेतितत्पदार्थप्रतियोगिकतत्संसर्गकव्याप्यधर्मकत्वं तत्पदार्थीयतत्संसर्गयोग्यतेत्यर्थः तादृशयोग्यतायत्र ता
नेन तत्र धर्मिणि तत्पदार्थस्य तेन संबंधेनान्वयबोधः धर्मिणि प्रकृतसंसर्गस्यैव वा कार्थतयाशाब्दबोधाशागदुर्ज्ञेय
त्वे ननु तद्व्याप्यधर्मस्यैसाशयः वा कार्थस्येति प्रकृतसंसर्गव्याप्यवत्ताज्ञानस्य प्रकृतसंसर्गानुमितिहेतुतया तस्य
शाब्दहेतुत्वे सर्वत्र शाब्दबोधात्पूर्वमनुमितिसामग्रीसत्वेन तस्य सर्वत्रानुमेयशाब्दसामग्र्याबलवत्तान्न संसर्गानु
मित्युपपत्तिरिति ध्येयं शाब्दबोधपदार्थस्य संसर्गमर्यादयाभानेन संबंधसंबंधावगाहिसंबंधविधेयकानुमितिहे
तुसंबंधव्याप्यवत्ताज्ञानघटितसामग्र्याः स्वसमानविषयकतादृशशाब्दसामग्र्यपेक्षया बलवत्त्वान्न अथवा सर्वत्र संसर्गा रा म.
नुमितिसामग्रीसत्वेऽनुमानादिवाप्रकृतसाद्विनिर्वाहेन शाब्दसामाग्र्या अनुपपत्तिरित्यस्यैवार्थः ननु संसर्गव्याप्यधर्मत्वे ७८

नतादृशधर्मत्वेन ज्ञायमानत्वं येन तादृशयोग्यताया ज्ञानघटिताया अपेक्षायां शाब्दधीपूर्वं अनुमितिसामग्रीनैय
त्यं स्यात् अपि तु वास्तवतादृशधर्मत्वमेव योग्यता सापि स्वरूपसत्येव हेतुर्न तु तज्ज्ञानायेन गौरवात् अपि तस्या
ज्ञानापेक्षायाम् उक्तदोषः स्यादिति शंकां निरस्यति न चेति योग्यताभ्रमादिति यद्यपि स्वरूपसत्येव योग्यता हेतुत्वा
दिना योग्यताभ्रमस्य शाब्दबोधहेतुत्वानंगीकारात् योग्यताभ्रमाच्छाब्दभ्रमो नोपपद्यत इति तदनुपपत्तिप्रदर्शनेन संगच्छ
ते तथापि शाब्दभ्रमे योग्यताभ्रम एवानुगतदोषो हेतुर्वाच्यः दोषांतराणाम् अननुगमात् तथा च स्वरूपसद्योग्यतायाः सा
मान्यकारणाविरहो योग्यताभ्रमाधीनः शाब्दभ्रमो न स्यात् योग्यताभ्रमस्थले स्वरूपसद्योग्यतासत्त्वाप्रसक्तेरित्याशयः के
चित्तु शाब्दभ्रमस्थले योग्यताज्ञानस्य भ्रमत्वेन सर्वसिद्धतया भ्रमत्वस्य विषयबाधाधीनतया स्वरूपसद्योग्यतास्थले स्व
रूपसद्योग्यताया असत्त्वादित्येव योग्यताभ्रमादिस्थलार्थ इति तु नासंगतिरित्याहुः तदसत् योग्यताज्ञानापेक्षायां त्रि
मग्रंथेन विरोधात् अन्वयनिश्चयविरहस्यापि सत्तो हेतुत्वे शाब्दस्थलेऽपि तत्सत्त्वेन शाब्दभ्रमानुपपत्तिविरहेणात एवेस्य

७९ संशयाद्यंशमात्रानुपपत्तेरित्यर्थकत्वात् संगतेरुक्तरीत्या यथाश्रुतव्याख्यापरत्वं न एवेत्यस्य संशयाद्यंशमो योग्यताभ्रमाधी
नत्वानुपपत्तेरेवेत्यर्थः भ्रमे च अन्वयनिश्चयविरहस्य प्रतिबंधकाभावतया स्वरूपसतः एव हेतुत्वे न तत्स्य योग्य
ताऽत्वे योग्यताया भ्रमात्मकज्ञानस्य संशयाद्यंशमहेतुत्वासंभवाद्यात्तमिसत्र हेतोरसंगतिः अतः अन्वयनिश्चयो
विशेष्ये विशेषणाभाववन्निश्चयः स च यद्विशेष्यकयद्विशेषणकस्थले प्रसिद्धः तत्र वतद्विरहरूपायोग्यता हेतुः स
र्वत्र भ्रमे मानाभावेन यादृशस्थले विशेष्ये विशेषणाभावभ्रमोऽप्रसिद्धिः तदभावरूपयोग्यतायाश्चाप्रसिद्धा हेतुत्वासं
भवेऽपि न क्षतिः एतादृशयोग्यतायाः कारणतासाधकमेतद्विरहस्य कार्याभावप्रयोजकत्वमिति धर्मिणीति शेषः
नत्र कारके त्वनापि नत्वे सत्त्व प्रत्यनेशाब्दज्ञानानुदयादित्याशयाभावज्ञानकाले समानधर्मिकपरोक्षविधि हेतुद्य
नुत्पादस्य सर्वानुभवसिद्धत्वादिति भावः समभिव्याहृतेति धर्मिणीति तत्पदार्थसंसर्गाभाववद्यावद्धर्मीभाववत्त्वं तत्पदा गम·
र्थयोग्यते नेत्यर्थः वह्निना सिंचतीत्यादौ सेकादौ विशेष्ये वह्निकरणकत्वादिरूपविशेषणाभाववद्यावत्सेकत्वादिसत्त्वा ७९

न्नतदभाव इति नातिप्रसंगः संसर्गाभावाप्रतिबुद्धेरिति विशेषणतावच्छेदकतादात्म्यसंबंधावच्छिन्नाभिधेयत्वाय
वच्छिन्नविशेषणाय वाभिधेयत्वाद्यवच्छिन्नाभावाप्रतिबुद्धेत्यर्थः तदनिरूपणादिति तद्व्याप्यधर्मशून्यत्वरूपयोग्यत्वाप्र
तिबुद्धेरित्यर्थः गेहनिष्ठघटाभावे घटे गेहाधिकरणकसत्ताभावे प्रमिते निश्चिते घटो नास्तीत्यस्य गेह इत्यादिः
तन्निश्चये गेहसत्त्वरूपविशेषणाभाववद्व्याप्यधर्मशून्यत्वरूपयोग्यतायाः तदभावनिश्चयस्य तदभावव्या
प्यधर्माभावाज्ञानाप्रतिबंधकत्वेन तन्निश्चयदशायां तादृशयोग्यताज्ञानसंभवादिति भावः अन्वयज्ञानानु
दयात् घटे गेहास्तित्वज्ञानानुदयात् तथा चोक्तज्ञाने हेतुत्वं तत्रान्वयबोधाभावान्निर्वाह इति नोक्तस्य योग्य
तात्वमिति भावः बाधकप्रमाणाभाव इति प्रकृतविशेषणसंसर्गनिष्ठविशेष्यवृत्त्यभावप्रतियोगित्वप्रमावि
शेष्यत्वाभाव इत्यर्थः विशेषणसंसर्गविशेष्यनिष्ठाभावप्रतियोगित्वग्रहे विप्रतिपत्तित्राप्रामाण्याग्रहे विशिष्टबु
द्ध्युत्पत्त्याबाधनिश्चयविषयात्तत्रतादृशप्रतियोगित्वप्रमाविषयत्वग्रह एव विशिष्टग्रहविरोधीति तादृशप्रतियो

80

८० गोत्वाभाववघटेऽस्य तत्प्रमाविषयत्वरूपबाधे तत्त्वाभावाद्यवगाहनं यत्र तद्वृत्त्याज्ञानांशाद्धी विशेषितत्र तदभावस्य
योग्यतो चित्तात्र अन्नोऽन्यनिष्ठतादृशप्रमाविषयत्वस्य प्रकृतसंसर्गनिष्ठतादृशप्रमाविषयत्वस्य अन्यनिष्ठता
यविशेषिततादृशप्रमाविषयत्वस्य वाऽभावो विवक्षितः तत्र प्रथमपक्षेऽतिप्रसंगमाहान्यत्रेति प्रकृतविशेष्यव्या
धितविशेषणसंसर्गातिरिक्तवस्तुनीत्यर्थः बाधकं तादृशप्रमाविषयत्वं अयोग्येपीति सेकादिरूपविशेष्यवह्नि
करणकत्वसंसर्गादावपीत्यर्थः द्वितीयपक्षं दूषयति नापीति प्रकृतसंसर्गेति प्रकृतविशेषणसंसर्गनिष्ठं यद्बाधित
त्वं तदभाववत्त्वसंसर्गनिष्ठ इत्यर्थः तथा च वह्निकरणकत्वादिसंसर्गनिष्ठस्य सेकादिबाधितत्वस्य संसर्गेऽसत्वाद्व्याप्तिव्या
त प्तिरितिभावः प्रतियोगीति यपप्रमाति चतीत्यादियोग्यस्थले प्रकृतपयः करणकत्वादिविशेषणसंसर्गनिष्ठं यत्सेकादिनि
ष्ठाभावप्रतियोगिप्रमाविशेष्यत्वरूपं प्रतियोगितत्वप्रसिद्धत्वमिति घेव तत्र तदभावव्याघातादित्यर्थः तथा च लक्षणेऽसं रा.म.
भव इतिभावः तृतीयं पक्षमाशंक्य निराचष्टे न चेति अन्यत्र प्रसिद्धस्य प्रकृतसंसर्गातिरिक्तगोत्वादौ प्रसिद्धत्वस्येत्यर्थः तथा च ८०

नप्रतियोग्यप्रसिद्धिरिति भावः बाधकस्याधिकरणविशेषनिष्ठत्वाविशेषितनिरुक्तबाधकप्रमाविषयत्वस्य प्रकृतसं
सर्गस्येति वाक्यार्थरूपस्येति शेषः न तु प्रकृतविशेष्यविशेषणोभयरूपरक्त एव प्रकृतसंसर्गः शाब्दबोधाप्रप्रती
तेः प्रकृतयोग्यताशरीरे च तादृशविशेषणमात्रोपरक्तः प्रकृतसंसर्ग एव निविशते तथा च न तद्घटितयोग्यतायाः प्र
थमतो दुर्ज्ञेयत्वमत आह अयोग्येपीति अन्यनिष्ठत्वस्य प्रमाविषयत्वविशेषणत्वेपि अन्यनिष्ठतादृशप्रमाविषयत्वाभा
वस्यापि तादृशप्रमाविषयत्वप्रतियोगिताकाभावत्वपात्तमादाय बाधितसंसर्गेपि निरुक्तयोग्यतासत्वादतिमाते रित्यर्थः
अयोग्यत्वेपि प्रकृतविशेषणसंसर्गविशेष्यनिष्ठाभावप्रतियोगित्वप्रमाविषयत्वत्वावच्छिन्नाभावनिवेशे न दोष इति गू
ढाभिसंधिरित्याशंकते न वेति प्रयोगासंसर्गेऽपि रैवपोऽसः बाधकं तादृशप्रमाविषयत्वं उक्तं आशयमनुध्या अन्यनि
ष्ठस्य तादृशप्रमाविषयत्वस्य अयोग्येपि संसर्गसत्वेनापि प्रकृतसंसर्गनिष्ठतस्सत्वान्न शाब्दप्रमेति तदभावस्यैव योग्यता
त्वं शंकितमित्यभिमानेन तादृशशंकाशेषं प्रकाशयन् पूर्वोक्ताप्रसिद्धिदोषेणो वपुनरुक्तसंसंदूषयति नहीति प्रकृतसं

81

८१

सर्गबाधकाभावः प्रकृते संसर्गनिष्ठबाधकप्रमाविषयत्वस्याभावः स च तादृशाभावस्याप्रसिद्ध एवेति योग्यता
संसर्गस्येत्यादिः अत्यन्ताभावरूपविरोधिनोऽप्रसिद्धौ न तत्र प्रतियोगिमत्त्वज्ञानं भवतु बाधकविरहादित्यत आ
ह अत एवेति प्रतियोग्यप्रसिद्धेर्वाप्रसिद्धोऽपीत्यर्थः तत्र बाधकस्याप्यनिरूपणादिति योग्यसंसर्गनिष्ठबाधकस्याज्ञा
नमित्यप्रतियोगिप्रसिद्धावेवाभावप्रसिद्धेर्वप्रतियोगिनोऽसंयतानियमादिति भावः विशेषणसंसर्गविशेष्यबाधि
तत्वाभावस्य योग्यतात्वं निराकृत्य विशेष्ये विशेषणसंसर्गबाधकाभावस्य तत्त्वं निराकरोति नापीति इतरपदार्थसंसर्गे
ति प्रकृते विशेषणसंसर्गेत्यर्थः अपरपदार्थे विशेष्ये योग्यतेति बोधः केवलान्वयिनीति यत्र विशेषणसंसर्गः केवला
न्वयी तत्र तत्र तदभावाप्रसिद्ध्याऽव्याप्तिरित्यर्थः एतेनेति केवलान्वयिनि प्रतियोगिनोऽप्रसिद्धत्वेनेत्यर्थः यत्र विशेष्य
स्य संबंधग्राहकप्रमाणं नास्ति यस्य विशेषणस्य संबंधग्राहकजनकं प्रमाणं स्वजन्यप्रमाविशेष्यत्वसंबंधेन नास्ति
तादृशे विशेष्ये तद्विशेषणयोग्यपूर्वप्रमापाश्च भावः उद्देश्यप्रमाकरणस्याभावो योग्यतेति भेदः यत्र यस्य संबंधग्रा

राम ८१

हकं संबंधविषयको ग्रहः प्रमाणां नाप्तिप्रमानभवतीत्यर्थः बोधनीयेति एकपदार्थे बोधनीये ऽपरपदबोधनी
यार्थसंसर्गाभावप्रमाविरह इत्यर्थः पूर्वपदार्थस्य पदार्थतावच्छेदकरूपेणनिवेशः इदानीं तु तत्तत्पदबोधनीयत्वे
नेति विशेषः प्रतियोग्यप्रसिद्धेरिति केवलान्वयिविशेषणसंबंधस्थले इत्यादिः दूषणांतरमाह बोधनीयेति तत्त
दजन्यशाब्दबोधात्पूर्वं तत्पदजन्यशाब्दबोधविषयत्वरूपतत्पदबोधनीयत्वविशेषितार्थोपरक्तसंसर्गज्ञानासं
भवादित्यर्थः नचतादृशासंसर्गस्यज्ञानेपि स्वरूपसंयोग्यतावलात् शाब्दबोधउपपत्स्यत इत्यत आह योग्यतां चे
त्तिज्ञावेदितमिति तथासति शाब्दभ्रमस्य योग्यताभ्रमाधीनत्वनिर्वाहो न स्यादित्युक्तेत्यादि दूषणांतरमाह योग्य
तितत्सत्त्वस्यएकपदबोधनीये अपरपदबोधनीयसंसर्गाभावप्रमाविरहस्यविशेष्ये विशेषणासंसर्गाभावप्र
माहृपबाधकप्रमाविरहस्य च योग्यतात्वपक्षबाधकांतरमाह अपि चेति स्वीयत्वं प्रमाविशेषणं स्वीयशाब्दबोधसं
भकालीयपुरुषः अयोग्येपीति अयोग्ये ईश्वरीयबाधकप्रमायाः सर्वदा सत्त्वेनपि तत्तत्पुरुषीयबाधकप्रमाविरहस्य

82

८२ दृशाविशेषे सैातल्पेन योग्यताप्रसंगादित्यर्थः तथा च योग्यताभ्रमाधीनत्वं शाब्दभ्रमस्योपपद्यत इति अर्थः
बाधकप्रमासामान्याभावयोग्यतात्वपक्षे नायं दोष इति तत्पक्षे दोषमाह तत्रानुं निश्चेतुं अशक्यत्वादिति शाब्दस्थले
देहदशायां ग्राह्याभावस्येव परकीयग्राह्याभावादिप्रमाया अपि विशेष्यादौ संदिग्धत्वादिति भावः इदं तु योग्यता
निश्चयपदे तु तत्पक्षे दूषणांतरं शयप्रसाधारणहेतुतामालक्ष्य विशेषणांसंसर्गानिष्टबाधकप्रमाविषयत्वाभावस्य
योग्यतात्वे सिद्धांते विघ्नते योग्यानुपलब्ध्याबाधकप्रमासामान्याभावो निश्चय इत्याशंक्य निरस्यति परप्रमाया इति अ
योग्यत्वादिति सत्वेपि प्रत्यक्षासंभवादित्यर्थः तथा च योग्यानुपलब्धिरेव न संभवतीति भावः स्वीयेति अयोग्यस्थ
ल इत्यादिः अयोग्यतानुमेयेति स्वरूपसद्योग्यताया असत्वेनेत्यर्थः योग्यानुपलब्धिविरहेण बाधकप्रमासामा
न्याभावस्य प्रत्यक्षासंभवेप्यनुमानान्निश्चयसंभवेन न शाब्दबोधानुपपत्तिरित्याशंकते अन्वयेति इवद्व्यत्वादि राम. ८२
ना जलादौ सेकाकरणत्वादिबाधकाभावोऽनुमेय इत्यर्थः सेकान्वितेति सेककरणत्वशून्ये इत्यर्थः बाधकसत्वेन सेकक

रणात्वबाधकप्रमाविषयत्वेसत्वेनव्यभिचारात् ह्रदद्रव्यत्वरूपहेतोस्तादृशप्रमाविषयताभाववद्रूपसाध्यव्यभिचा
रात् तथा च विशेषदर्शनेनोक्तहेतुकानुमानसंभव इति उपजीव्यत्वेन बाधकप्रमाविरहज्ञानोपजीव्यज्ञानकत्वेन
तस्यैवान्वयप्रयोजकरूपस्यैवयोग्यतात्वापत्तेः शाब्दधीहेतुतापत्तेः इष्टापत्तिशंकां निरस्यति नन्वेवमिति एवमेवा
न्वयप्रयोजकरूपस्यैवयोग्यतात्वमिष्यतां वास्थिति तदितिशेषः आकांक्षेति अनाप्तोक्तवाक्यस्यापि रजलपयसा सिंच
तीत्यादिवाक्ये बाधानवतारेऽन्वयबोधस्येष्टतया बाधकप्रमाभावामितिसत्त्वामितिशेषः आवश्यकत्वादिति योग्यतांतर
ज्ञानहेतुत्ववादिनापि स्वीकरणीयाहेतुताकत्वादित्यर्थः तेन बाधकप्रमाविरह एव पुंलिंगशब्देन तस्य प्रकांतत्वेपि स्त्री
लिंगयोग्यपयोग्यतापदेन सामानाधिकरण्यात् तत्स्त्रीलिंगतात तच्छब्दस्य शेषं संहितत्वाप्रकृतिर्जलस्येति वह्निशेषाणां सं
सर्गाभावप्रमाविरहस्य केवलान्वयि विशेषणकस्थले प्रतियोग्यप्रसिद्ध्या पूर्वपक्षग्रंथे दूषितत्वेपि बाधकप्रमाप
देन दोष इत्याशयेनं बाधकप्रमाविरहस्यैव योग्यतात्वं सिद्धांतयति बाधकेति पूर्वोक्तदोषोद्धारं स्फुरयति साचेतिता

83

८३ गृहीतादृशयोग्यताचेत्यर्थः अत्रतत्पदस्य पुंलिंगमात्रपदसामानाधिकरण्येपि नपुंसकलिंगतातत्पदार्थस्य
विशेष्यत्वेन विवक्षितत्वात् विशेषणपदे एव विशेष्यसमानपदलिंगताया नियतत्वात् ननु विशेष्यपदे विशेषण
समानलिंगतायाः कारकत्वं लंप्रकारइत्यादिदर्शनात् तस्यैव योग्यते सत्रतत्पदार्थस्य योग्यतापदार्थे विशेषणतेव
विवक्षिता विशेषणविशेष्यभावेकामचारात् इतरपदार्थसंसर्ग इति विशेषणसंसर्ग इत्यर्थः तस्यचाभावेऽन्वयो
ननु प्रतियोगिनि अन्तोनाप्रसिद्धिरित्यनुपदं स्फुटीपिष्यति अपरपदार्थो विशेष्यं विशेष्ये च तत्तद्व्यक्तित्वेन प्रवेशः
कार्यः ननु विशेष्यरूपेण अन्तोनिप्रसक्तविशेष्यतावच्छेदकसामानाधिकरण्येन विशेषणसंसर्गेणान्वयपरत्वा
को विभिन्नधर्मिप्रविभिन्नविशेषणान्वयपवाकेचयोग्यतानिर्वाहः एवंच विशेषणस्यापि तत्तद्व्यक्तित्वेन निवेशः ननु वि
शेषणतावच्छेदकरूपेण विशेषणतावच्छेदकाक्रान्तैकव्यक्तिनिष्ठस्य विशेष्यनिष्ठाभावप्रतियोगित्वप्रमा विशे ए म० ८३
ष्यत्वाभावस्यबाधितविशेषणव्यक्तियोग्यतात्वविरहात् तथा चूत्तत्तद्व्यक्तिप्रतियोगिकप्रकृत्तानिष्ठतत्तद्व्यक्तित्वस्य

स्यो भावः तद्घटत्वेन तेन संबंधेन तत्तद्घटत्वान्वययोग्यतेत्यर्थः धर्मितावाधितस्यापि संसर्गस्य द्वित्वाद्यवच्छिन्नाभाववि
शिष्टाभावमादाय दोषाभावे प्रतियोगिवैयधिकरण्यविशेषणेन वारणीयः अत एव पञ्चव्याप्त्युद्धृत्ति संयोगा
दिसंबंधस्य शाब्दधीविषयः तत्र योग्यतानिर्वाहः संयोगस्य तथात्वेन घटवद्भूतलमित्यादौ नामार्थयोर्भेदेनान्व
यस्याव्युत्पन्नतया तत्र भूतलादौ घटादेः साक्षादन्वयानङ्गीकारात्तस्य संबंधेन घटादिसंबंधिन एवा अपि तु कांव्यप कौंक्षप वैं
ष्ठतीत्यादौ आख्यातोपस्थापितवत्यादिरूपव्यापारस्य कार्यादौ अन्वयस्थले भूतलं घटवदित्यादावपि मतुवर्थ
पारतंत्र्येण घटादेर्भूतलादावन्वयबोधोपगमे च संबंधस्य संबंधताबोध्या अथ समवायैकपदे वाय्वादावपि
समवायेन रूपान्वययोग्यतापत्तिः रूपादिप्रतियोगिकत्वविशिष्टसमवायाभावस्यकाशादौ सत्त्वेऽपि लक्षणाघट
कत्वात् प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यस्य लक्षणघटकत्वे चोक्तस्थले संयोगसंबंधेन यो
ग्यतानिर्वाहः विशेषणतासंयोगस्याविशेषणत्वाद्वृत्तित्वविशिष्टस्याविशेष्ये विशेष्यप्रतियोगिव्यधिकरणाभावसत्त्वा

84

८५ दितिचेन्न यः संबंधोऽभावप्रतियोगितावच्छेदकस्तत्र विशेषणतोऽन्वयितावच्छेदकसंबंधावच्छिन्नप्रतियोगि
ताकविशेष्यनिष्ठाभावप्रतियोगित्वप्रमाविशेष्यत्वाभावस्यैव योग्यतात्वोपगमात् यत्र हृस्वनियामकप्रति
योग्यनुयोगिभावादिः संबंधस्तत्र तादृशसंबंधस्य प्रतियोगितावच्छेदकत्वाभावेन विशेष्यनिष्ठतत्संबंधा
वच्छिन्नाभावाप्रसक्त्या योग्यतानुपपत्तिरिति तत्संबंधनिष्ठप्रमाविरहः एव योग्यतेत्युपगमेन सामंजस्या
त् यद्यपि प्रतियोगित्वाभाववति वैशेनैवोपपत्तिः नच तथाप्यप्रामाण्यज्ञानास्कंदितबाधज्ञानस्य विशिष्टबुद्ध
विरोधितया विशेष्ये विशेषणाभावप्रमाविषयत्वज्ञानवद्विशेषणासंसर्गादौ विशेष्यनिष्ठाभावप्रतियोगि
त्वप्रमाविषयत्वज्ञानस्यैव विशिष्टज्ञानविरोधितामणिकाराद्यमतायस्य च ज्ञानं बाधनिश्चयविशिष्टज्ञानाविरो
धितदभावएवाबाधितत्वरूपा योग्यताऽस्त्वाशयेन प्रतियोगित्वप्रमाविषयकत्वाभावानुधावनं त्वत्र च प्रतियोगित्व रम॰ ८५
स्य विषयपर्यंतज्ञानस्य विशिष्टबुद्धिविरोधित्वेपि प्रतियोगित्वाभावस्य तदभावाद्यभावानात्मकत्वेपि च प्रतियोगि

व

त्वाभाववज्ज्ञानेपि प्रतियोगित्वप्रमाविषयत्वज्ञानस्य प्रतिबंधकतयाप्रतियोगित्वाभाववज्ज्ञानस्य शाब्दबोधहेतुताप्र
पगमापि वाधग्रहकाले शाब्दबोधापत्तिवारणसंभवे न प्रतियोगित्वाभावस्य योग्यतात्वं संभवतीत्याशयेन निष्क
लः लक्षणे प्रमाविषयत्वांशः परित्यज्यते प्रमेयं वाच्यमिति विशेषणसंसर्गाभावप्रमारूपबाधकप्रमाणप्र
सिद्धत्वपीति शेषः प्रमेयनिष्ठेति प्रमेयरूपविशेष्यपदार्थनिष्ठस्यार्थः वाच्यत्वसंसर्गेण वाच्यरूपविशेषणतादा
त्म्यवाच्यत्वमखंडविशेषणसंबंधइत्यभिमानेनेदंयद्विवाच्यत्वेन भासमानानामपि तत्तद्व्यक्तीनां विभिन्नतादात्म्या
नि तत्तद्व्यक्तिसंबंधतया भासंते तद्विशेषणसंसर्गाभाववत्त्वाप्रसिद्धनवकाशः परंतु विशेषणताविशेषेणाकाशा
द्यभावस्य घटपदेनोभयत्वावच्छिन्नाभावविशेषणत्वे तत्र विशेषणसंसर्गाभावाप्रसिद्धिरिष्टत्वान्न तु तत्तद्व्यक्तित्वेन
विशेषणविशेष्ययोर्योग्यताशरीरे निवेशः सामान्यरूपेण विशेषणविशेष्यभावं दर्शयति तद्व्यक्तित्वेन तदुपस्थि
त्यनैयत्यं सा न सर्वत्रयोग्यताज्ञाननिर्वाहः समानप्रकारकबाधज्ञानस्यैव विरोधितया सामान्यरूपेण विशेष्यादिविषय

85

८५ कवाधग्रहदशायां तत्तद्व्यक्तित्वेन तद्विषयताकज्ञानसंभवात्सामान्यतः तद्विषयकशाब्दबोधापत्तिश्चेत्स्यतः सामा
न्यतः पदार्थद्वयघटिताप्रतियोगितावच्छेदकत्वाभावगर्भायोग्यताज्ञानवत्त्वन्तस्त्विति एकपदार्थसंसर्गे तत्तद्विशेष
णतावच्छेदकावच्छिन्नप्रतियोगिकत्वविशिष्टतत्तत्संसर्गतावच्छेदकेऽपरपदार्थनिष्ठेतत्तद्विशेषणतावच्छेदकाव
च्छिन्नवृत्तिकेत्यर्थः प्रतियोगितावच्छेदकधर्मप्रतियोगितावच्छेदकत्वं तथा च तद्रूपाश्रयप्रतियोगिकत्वविशिष्टयादृशसंस
र्गतावच्छेदके यद्रूपावच्छिन्नबाधकाभावप्रतियोगितावच्छेदकत्वाभावः स तद्रूपावच्छिन्नसंबंधेन तद्रूपावच्छिन्नेधर्मिण्यन्वय
योग्यत्वेत्यर्थः हेतुत्वञ्च गतद्रूपावच्छिन्ननानाव्यक्तिविशेषणकस्थले चालनीन्यायेन सर्वासामेव विशेषणव्यक्तीनामनेकवृत्तिविशे
ष्यतावच्छेदकसामानाधिकरण्येन संसर्गाभाववत्त्वेऽपि विशेष्यतावच्छेदकावच्छिन्नवृत्तिकाभावाप्रतियोगित्वं सुलभमिति प्रथम
वच्छेदकगर्भतेति नयांकां तद्व्यत्नेऽपि तद्वित्वादिनाभाववत्त्वेन विशेष्यतावच्छेदकावच्छिन्नवृत्तिकाभावाप्रतियोगित्वस्य विशेषणा ग्र. म.
संसर्गे दुर्घटत्वात् अत्र घटद्वित्वादौ घटाद्यभाववत्तद्वृत्तित्वरूपविशेषणासंसर्गसत्त्वात् योग्यतानिर्वाहः स्यादिति विशेष्यतावच्छे ८५

दकाश्रयवृत्तित्वमुपेक्ष्यविशेष्यतावच्छेदकावच्छेदकेनवर्त्तमानत्वस्याभावनिवेशः नचैवंघटत्वावच्छेदेन एतद्देशवृत्तित्वा
यत्वेपितत्रयोग्यताप्रसंगइतिवाच्यंयत्तत्तद्घटादिरूपविशेष्यविशेषणान्वयेनयोग्यतायांत्ववच्छेदकानवच्छेदेनबोधवि
शेषणाविशेष्यतावच्छेदकयोरवच्छेद्यावच्छेदकभावसंबंधेनविशेषणविशेष्यभावोपगमात् उक्तस्थलेतयोःतादृशसंबंधेनान्व
यबोधएवयोग्यतातात्पर्यवतएवेतियदिचस्वावच्छेदकावच्छेदेनबोधेधर्मितावच्छेदकावच्छिन्नत्वंतुविशिष्यतत्संबंधेनधर्मि
णिविशेषणस्यसंसर्गाद्युक्तंतथापिदर्शितस्थलेविशेषणप्रतियोगिकतादृशसंबंधाप्रसिद्ध्यानयोग्यतालक्षणातिव्याप्तिः ए
वंचविशेषणतांतदुपलक्षितविशेषणत्वंविशेष्येऽबोधितंविशिष्टविशेषणत्वंतुबोधितंतत्रविशिष्टप्रतियोगिकविलक्षण
णवैशिष्ट्यस्यविशेषणसंबंधानात्मकत्वेपितादृशसंबंधस्यविशेष्येअभावसत्वान्नविशिष्टवैशिष्ट्यपरवाक्येयोग्यतानिष्प्रसंगः यदि
चतादृशबोधप्रतियोगिकत्वविशेषितेएवतत्तत्संबंधोविशेष्येविशेषणसंबंधः परंतुविशेषणतापारतंत्र्येणविशेष
णतावच्छेदकस्यैवविशिष्यस्वविशिष्टप्रतियोगिकतत्तत्संबंधपर्यंपणसंबंधेनप्रकारतातदातत्रविशेष्येविशेषण

86

८६ न्वयेयोग्यतैवयोग्यतानुतादृशापरंपरासंबंधेन विशेषणतावच्छेदकान्वय एवेति वोध्यं न च विशिष्यतावच्छेदका
वच्छेदेनवह्निमानाभावनिवेशे एतद्देशवृत्तिघटतात्पर्यकेऽत्र घटइति वाक्येपि योग्यतास्यात् एवं स्थिरजलकर
णकत्वसंसर्गस्य सेकाभावसत्त्वेपि जलकरणकत्वरूपसामान्यधर्मे सेकनिष्ठाभावप्रतियोगितावच्छेदकाभा
वसत्त्वेन स्थिरजलतात्पर्यकपयसासिंचतीत्यादिवाक्येऽतिप्रसंग इति वाच्यं तादृशवाक्येपि शाब्दसामान्ये ज्ञानो
पयोगिन्यायोग्यतायाः स्वीकारेक्षतिविरहात् तत्तद्विशेष्यद्विशेषणव्यक्तिघटितायायोग्यतायाश्च विस्वरूपसत्ताः
शाब्दबोधोपयोगितास्वीकारेणोक्तवाक्यानांप्रामाण्यापत्त्यनवकाशात् अव्याप्यवृत्तिसंसर्गकस्थलेसाधारण्या
याश्चापि स्वप्रतियोगिवैयधिकरण्याभावविशेषणमुपादेयं न च प्रतियोगितावच्छेदकविशिष्टवत्त्वगर्भवाच्यं अ
तः समवायेकामतेवायाद्यादेरूपादिप्रतियोगिताकत्वविशिष्टसमवायाभावस्यप्रतियोगिसमानाधिकरणत्वेविशि राम
ष्टप्रतियोगिव्यधिकरणत्वेनातिप्रसंगावकाशः प्रतियोगिवृत्तित्वस्य विशिष्टसंयोगस्यानुयोगिनि विशिष्टप्रतियो ८६

गिव्यधिकरणत्वस्य तत्तद्विशेषणप्रतियोगिकत्वविशिष्टसंयोगत्वस्य तादृशाभावप्रतियोगितानवच्छेदकत्वात्
अथ प्रतियोगित्वविशिष्टसंबंधविशेषत्वे विशेष्यवृत्त्यभावप्रतियोगितानवच्छेदकत्वग्रह विशेष्यविशेषणसंस
र्गाभावग्रहस्याभावेन तादृशसंसर्गत्वावच्छिन्नप्रतियोगिताकत्वावगाहिनस्तुल्यवित्तिवेद्यतया तादृशसत्त्वस्याभाव
प्रतियोगितावच्छेदकत्वावगाहित्वं उपगम्य कथंचिद्विरोधितोपपादनेऽप्यस्मिंस्ते कोन वह्निकरणक इत्यादौ विशेष्यविशे
षणबोधग्रहस्य वह्निकारणकत्वादिरूपप्रतियोगिकसंसर्गकत्वे सेकादिनिष्ठाभावप्रतियोगितावच्छेदकत्वावगाहि
तया असंभवेन तादृशधर्मप्रतियोगितानवच्छेदकत्वविरोधितया तादृशबाधग्रहदशायां वह्निनासिंचतीत्यादिवाक्यात् ६१
शाब्दबोधापत्तिः यत्र विशेषणसंबंधो वृत्तिनियामकः तत्र विशेषणतावच्छेदकधर्मविशेष्यवृत्त्यभावप्रतियोगिताव
प वच्छेदकत्वाभावरूपयोग्यता विशेष्ये विशेषणतावच्छेदकावच्छिन्नाभावस्य दर्शितत्वात् तथा तादृशयोग्यताज्ञानविरोधि
तया तादृशबाधग्रहस्य शाब्दबोधविरोधितानिर्वाहः विशेष्ये विशेषणसंसर्गस्याभावग्रहविरोधीति तस्य उक्तयोग्यताज्ञा

वा

87

८७ नविरोधिनः शाब्दबोधविरोधित्वमित्युक्तमेव शाब्दबोधे संसर्गस्य प्रकारत्वानभ्युपगमे च विशेषणतास्य संबंधो वृत्त्यनिया
मकः तत्र तत्संबंधावच्छिन्नाभावाप्रसिद्ध्या तत्संबंधेन विशिष्टवृत्तावन्योन्याभाव एव शाब्दबोधविरोधी इति तत्र विशे
ष्यतावच्छेदकावच्छिन्नविशेष्यवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकत्वाभावरूपयोग्यताज्ञानस्यैव हेतुतोपेयते अन्यो
न्याभावविषयकबाधग्रहनद्विरोधितया शाब्दबोधविरोधितापत्तिरिति चेन्न एवमपि यत्र पदार्थयोः संबंधो वृत्त्यनिया
मकः तत्रान्योन्याभावविषयकबाधग्रहदशायां असंसर्गाभावगर्भयोग्यतासंबंधेन शाब्दबोधापत्तिश्च द्विविधमपि यो
ग्यताज्ञानस्य परस्परसहकारेणैकविधशाब्दबोधहेतुतायामनुभवविरोधः असंसर्गाभावेऽन्योन्याभावे वा विशेष्य
वृत्तित्वभ्रमदशायां असंसर्गाभावगर्भयोग्यताज्ञानस्यासंभवेन योग्यताद्वयाज्ञानेऽपि शाब्दबोधस्यानुभविकत्वान्न एवं
ग्राह्याभावज्ञानकालेऽप्युक्तयोग्यताज्ञानासंभवेन शाब्दबोधापत्तिः न तस्य शाब्दबोधे तस्य साक्षात्प्रतिबंधकत्वोपगमे एमः
बाधज्ञानस्यापि तथात्वमुपगम्यतां किं योग्यताज्ञानहेतुतया न च शाब्दप्रमात्वमयोः न च सामग्रीभेदाद्योग्यताप्र ८७

मात्रमयोः तदुभयहेतुत्वमावश्यकमिति वाच्यं विषयवाधस्थलेप्युक्तयोग्यतासत्त्वस्योपदर्शितत्वात
त्प्रमाभ्रमसत्योश्च शाब्दप्रमाभ्रमनियामकत्वासंभवात् नियामकांतरस्यानुसरणीयत्वया तस्माद्धि योग्यतावच्छेद
कविशिष्टे प्रकृतसंसर्गेणाविशेष्यतावच्छेदकावच्छिन्नत्वं योग्यतासंशयसाधारणं उक्तज्ञानमेव शाब्दधीहेतुरतो वा
कार्थरूपायाः सत्त्वा सर्वत्र निश्चेतुमशक्यत्वेपि न क्षतिः तज्ज्ञानस्य विशिष्टवुद्धिविरोधिनां यात्त्वाभावयात्त्वावच्छेदक
श्राप्यतावच्छेदकधर्मादिज्ञानानां सर्वेषां प्रतिवध्यतया तेषां शाब्दधीविरोधितानिर्वाहः उक्तनानाविधप्रतिवंधकानामभा
वकूटस्य शाब्दधीहेतुत्वापेक्षयाप्यल्पस्य प्रतिवंधकस्य शाब्दसामग्रीशरीरनिवेशोपेक्षयानावत्त्वतिवध्यदर्शितैकयोग्यता
धियस्तद्धेतुत्वेन तत्सामग्रीघटकत्वे च लाघवेन तद्धेतुत्वासिद्धिः वाधादिनिश्चयप्रतिवंधकतायां भ्रमत्वज्ञानाभावोऽवच्छेदकः म
योग्यताज्ञानहेतुत्वे च भ्रमत्वनिश्चयाभाव इति गौरवं स्व त्यामिस्य किंचित्करं विशेषमालोकरिष्यामः अनुसंधेयं लाघ
वादिति प्रथमोपदर्शितयोग्यतायाः प्रमागर्भत्वेन गौरवादिति भावः वाक्यज्ञानत्वादिति प्रथमयोग्यतायां पदार्थानां तत्त

४४

८८

व्यक्तित्वेन निवेनीयतया दुर्ज्ञेयत्वादिति भावः यत्तु स्वकीयबाधकप्रमाविरहस्यातिप्रसक्ततया पूर्वलक्षणास्वप
रसाधारणबाधकप्रमासामान्यविरहस्य विवक्षणीयतया परकीयबाधप्रमायाः सत्वेप्यग्रहेणाप्रथमयोग्यतायाश्च
शक्याज्ञानगोचरमायाः प्रमयास्वघटितत्वेन शक्यज्ञानत्वेतिपूर्वपक्षेबाधकप्रमाविरहस्यज्ञातुमशक्यत्वादित्यस्यद
र्शनेनाशयव्याख्यानं तन्नशोभनं वाक्यार्थनिश्चयं विनाप्रमयास्वघटितायाअबाधितत्वादिरूपयोग्यतायादुर्निश्च
यतयासंशयसाधारणाधियोहेतुत्वात्तद्बाधकप्रमाणाभावस्यदुर्निश्चयत्वेपि च संशयसंभवात् नतुनरशिरोहस्ति
शुचिः प्राण्यंगत्वाच्छंखवदित्यनुमानेन नरशिरोस्थ्यानमशौचाभावरूपशौचनिश्चयसंभवेन मलमूत्रपुरीषास्थि
निर्गतन्त्यशुचिस्पृष्टमित्यादिवाक्याच्छाब्दबोधानुपपत्तिश्चेति चेन्न शौचेबाधितत्वग्रहेणाबाधितत्वरूपयोग्यताज्ञाना
संभवादित्याशंकां निरस्यति न चेति बाधिताद्बाधकग्रहेणासंभवादबाधितत्वरूपयोग्यताज्ञानेरूपसहकारिसमव ए.म.
धानकात् अन्वयावबोधः अन्वयबोधासंभवात् उपजीव्यत्वेनेतिदृष्टांतरूपशंखेन साध्यनिश्चयसंपादकतयोक्तानुमा ८८

नोपजीव्यभूतस्यवेदस्यमानतावछेदकरूपेणसजातीयतयाऽशेषचबोधकशाब्दत्वेनेत्यर्थः वलवत्वात्
निश्चितप्रामाण्यकत्वात् अशेषचबोधकवेदस्यनिर्दोषपुरुषादिप्रणीतत्वेनतादृशस्मृतिवाक्येचवेदमूलततथा
प्रामाण्यनिश्चयः संभवतीतिबोध्यंतेनतादृशशाब्दबोधार्थविरोधिविषयकत्वेनतदनुमानबाधादिति अशे
षानुमितिजनकपरामर्शेऽप्रामाण्यग्राहयित्वानुमितिविघटकतयाकथंचिदुत्पन्नायामनुमितावप्रामाण्यज्ञापना
द्वेत्यर्थः तथाचनयोग्यताज्ञानविघटनमितिभावः ननुबाधाद्यभावस्यनपृथक्कारणतायेनतदभावहेतुत्वकल्प
नयायोग्यताज्ञानहेतुत्वमतेगौरवं किंत्वनुमित्यादिसाधारणलौकिकसंनिकर्षाद्यजन्यविशिष्टबुद्धित्वावछिन्नंप्र
तिक्लृप्तबाधाद्यभावहेतुत्वादेवयोग्यतानिश्चयदशायांशाब्दबोधहेतुतानिर्वाहइतिकिंयोग्यताज्ञानस्यहेतुत्वे
तिनचितिआकांक्षासत्तिज्ञानरूपसहकारिमात्रसमवहितत्वेनप्रमाणतयाशाब्दबोधोपधायकतायाग्यतापियोग्य
ताधीरपितद्विरोधिनीशाब्दबोधोपधानप्रयोजकसामग्रीप्रविष्टोच्यतेबाधाभावस्यबोधनिश्चयाभाववस्यप्रमा

89

ग्राहेतुत्वाल्लौकिकसन्निकर्षाद्यजन्यविशिष्टबुद्धिसामान्यंप्रतिकॢप्तहेतुतयाऽनतिप्रसंगात्बाधेशाब्दधीवि
८९ रोधिनिबाधनिश्चयोहियतःप्रमाणदोषःशाब्दधीजनकयत्किंचिज्ज्ञानविरोधित्वस्यावश्यवक्तव्यामितितथाच
योग्यताज्ञानस्यतद्धेतुत्वेबाधेशाब्दधीजनकयत्किंचिज्ज्ञानविरोधित्वनिर्वाहात्तस्यतद्धेतुत्वमावश्यकमितिभा
वः विषयबाधस्यैवप्रमाणदोषत्वासंभवेनयथाश्रुतासंगतिर्बोध्याप्रमाणविषयेशाब्दज्ञानजनकसकलज्ञाना
मांबाधस्थलेसत्वेनबाधासंभवात्बाधबुद्धेःशाब्दबुद्धिविरोधित्वासंभवात्जनकतांविघटयतएवज्ञानस्यजन्य
ज्ञानविरोधित्वमितिनियमादितिभावःअनुमितिप्रतिरोधिनाबाधग्रहस्यतज्जनकतानाविघटकत्वेनतत्रैवव्यभिचा
राद्युक्तनियमसंभवइतिअनुमितिस्थलमेवदर्शयतिपर्वतेतिबाधाद्व्याप्तिविघातःबाधज्ञानेनव्याप्तिज्ञानवि
घटनंतस्यसाध्यव्याप्तिज्ञानविघटकत्वासंभवात्तत्रआहउपाधिकल्पनद्वारासोपाधित्वज्ञानसंपादनेनउपाधि एम
ज्ञानस्याविव्यभिचारज्ञानद्वारकतावोध्याबाधस्योपाधिकल्पकतांबीजभूतांदर्शयतिनिरूपाधाविति पक्षधर्मेहे ८९

तोरिति शेषः बाधानवकाशात् पक्षबाधितसाध्यकत्वात् स्वपक्षधर्मव्याप्यहेतुके ह्रदो वह्निमान् धूमादित्यादौ
उपाधिकल्पकात्वासंभवेपि पक्षधर्मज्ञानविघटकत्वं बाधज्ञानस्येति नियमनिर्वाहो द्रष्टव्यः पक्षधर्मताज्ञान
विघटकत्वे च स्वव्याप्यकत्वेन गृहीतसाध्यस्याभाववत्त्वग्रहे पक्षे हेतोरभाववत्त्वग्रहो स्यात्तद्द्वारा बोध्यं अबाधितत्वादि
ज्ञानस्यानुमितिहेतुतामते बाधस्य तद्विघटकतयैव नियमोपपत्तिरिष्टव्याप्रयो। जिकेति शाब्दसामान्यप्रतीसा
दिः प्राब्दाभासः शाब्दभ्रमः उच्छेदप्रसंगादिति भ्रमस्थले विषयबाधस्यावश्यकतया स्वरूपसत्सत्तदभावरूपायायोग्यताया
श्च संभवादिति भावः उपाधाभावादिति श्च बाधरूपयोग्यताग्रहे बाधरूपकोटिभानानिवृत्तिप्रयोजकाभावादित्यर्थः विपर्ययो
भ्रमः प्रमाश्चाबाधिता तत्र कोटिनिश्चयः तत्ताधारणास्य तत्ताधारणायोग्यताज्ञानत्वावच्छिन्नस्य न तु संशयसाधारणयोग्यताज्ञा
नस्य हेतुत्वेप्ययोग्यतानिश्चयदशायां न शाब्दधीप्रसंगः अयोग्यतानिश्चयानंतरं क्षणे तत्संशयासंभवनीयसंशयानंत
रं क्षणे योग्यतानिश्चयसंभवेन सामग्री सत्त्वादित्यत आह योग्येति ज्ञानस्याविशिष्टबुद्धित्वप्रतिबंधकस्य विशिष्टबुद्धिसा

९०

९०
मान्यविरोधिनः सर्वचरणव्यादिप्रवृत्तिसामान्येऽभावात् कारणीभूतापेक्षणान्न तनुषादवोधात्स्वरूपनिश्चयासंभवेन
तत्साधारणहेतुत्वाभिधानविरोध इत्यत आह क्वचिदिति योग्यानुपलब्धेति यत्राभावस्य तन्मात्रस्य ज्ञानं तदभिप्रायेणेदं यो
ग्यानुपलब्ध्याद्यात्वघटाद्यभावस्य प्रत्यक्षतो निश्चये विशिष्य तदभावस्य घटादेः संशयासंभवेन तत्र निश्चयाप्रवृत्तिं त्वनि
श्चयाद्विशेष्यप्रवृत्तिलाभाय वस्तुविशेषदर्शनेन घटाद्यभावविशेष्यकत्वसमावापत्तियोग्यत्वप्रतत्त्वमाविषयत्वस्य च स्व
निश्चयत्वं वोध्यं साकाङ्क्ष एकवाक्यानुकूलत्व संगताः अयोग्यताया निरूप्यासत्तिं निरूपयितुमाह आसत्तिश्चेति अव्यवधा
नेनेति विशेषणेन तृतीयातत्पुरुषे चाव्यवहितत्वस्योपस्थितौ वैशिष्ट्यलाभान्नयथोः पदार्थयोः परस्परान्वयवोधजनकभावो
पस्थितावव्यवहितापदोपस्थितिः तदन्वयवोधोपयिकासत्तिरित्यर्थः नीलो घटो द्रव्यं पट इत्यादौ क्रमोच्चरितनीलादिपदेभ्यः
क्रमेण नीलाद्यर्थोपस्थितेः नीलाद्युपस्थितिव्यवहितघटपदान्नीलपदार्थान्वये नीलपदादिपदानामासत्तिः इयं चासत्तिर्ज
नकतासंबंधेन पदस्यासत्त्वमुपादयति अव्यवधानं च स्वध्वंसाधिकरणसमयध्वंसानधिकरणत्वे सति स्वप्रागभावाधिक

रा.म.
९०

रणासमम घ्राणमाभावानधिकरणं यः समयः तद्वृत्तित्वं पूर्वोत्तरसाधारणं वोध्यं एकार्थोपस्थित्युत्तरस्या अपरपदो

पस्थितेरपरपदार्थोपस्थितेर्व्यवधानेऽपि निरूक्तमव्यवहितत्वं नीलो घट इत्यादौ च नासन्नानां नीलघटादिपदा

नाममस्त्येतमेव नीलाद्युपस्थितिजन्यतीयघटाद्युपस्थितिसमयोऽनधिकरणं तद्वयसत्वात् वस्तुतः प्रकृतान्वयवोधान

नुकूलोपस्थितिसंबंधेन तादृशत्वमेवाव्यवधानं अर्थोपस्थापकपदोपस्थिति अर्थोपस्थितिद्वारा प्रकृतान्वयवोधानुकू

लैवेति तयार्थोपस्थितेर्नातिप्रसंगः अतो नीलाद्युपस्थित्यनंतरं घटादिपदाद्घटक्रमिकघकाराद्यनेकवर्णग्रहो

त्तरमेव घटादिरूपार्थोपस्थितेस्तादृशोपस्थितिक्षणस्य नीलाद्युपस्थितिनाशाधिकरणसमये व्यं साधिकरणतया अ

नधिकरणत्वांतविशेषणाक्रांतत्वेपि न दोषः प्रकारादिसकलवर्णोपस्थितीनामेव घटाद्युपस्थितिद्वारा घटा

दिघटितवाक्यार्थवोधानुकूलतया नीलाद्युपस्थित्यनंतरत्वघटिततदव्यवधानस्य घटाद्युपस्थितावसत्वात्

एतेन नीलः सुंदरो घट इत्यादौ नीलाद्युपस्थितेरव्यवहितविशेषणांतरसुंदरोपस्थित्यादिनाव्यवधानेन नीलघटयोरस

91

९१ न्ना। क्षतिरिति दोषस्याप्यनवकाशः अत्र प्रकृते त्वाद्दशनानाविशेषणविशेषितघटादिरूपवाक्यार्थबोधसुंदरादि
रूपविशेषणतदुपस्थापकपदोपस्थितीनामनुकूलत्वात् ग्रामं भुंजानश्चैत्रो ओदनं गच्छतीत्यादौ धानगमेनाद्योद
नभोजनाद्यन्वयबोधाप्रयोजिकास्मिति प्रसंगः व्यवधायकत्वात्तत्पदार्थोपस्थितीनां तदनुकूलत्वत्पदार्थोपस्थितीनां
चत्तापदार्थघटितमहावाक्यार्थबोधानुकूलत्वादित्यिवाच्यं यतो यादृशविशेषणविशेष्यभावापन्नस्यप्रकारत्वया
प्रकृतवाक्यार्थबोधमानेतदनुकूलविशेषणतदुपस्थापकशब्दोपस्थित्यन्वयप्रतियोग्युपस्थापकशब्दोपस्थितीना
मेव प्रकृततवाक्यार्थबोधानुकूलत्वमनेन विवक्षणात् घटः सुंदरो नीलइत्यादौ सुंदरादिपदार्थविशेष्यतापन्नघटादौ
नीलादेः प्रकारतयानीलाद्युपस्थितेः सुंदराद्युपस्थिसासुंदरपदाद्युपस्थितिरव्यवहितत्वेपि चैत्रो ग्रामं गच्छतीत्यादौ
ग्रामकर्मकत्वादिविशेषितगत्यादेः चैत्रादौ प्रकारतया गत्याद्युपस्थितेर्गत्याद्युपस्थिसाचैत्राद्युपस्थितिरव्यवहित रा०म०
त्वेपि च नीलघटाद्योर्गतिचैत्राद्योरन्वये नासत्तेरुपपत्तिः सुंदरादेर्ग्रामकत्वादेश्च निरूक्तविशेषणरूपत्वात्तदर्शिना ९१

नासन्नस्थलेचतादृशविशेषणोपस्थित्यापिभिन्नभोजनाद्युपस्थितेर्विशेष्यविशेषणोपस्थितित्वमव्यवधायक
त्वान्नातिप्रसंगः अत्र वदंति क्रमिकाणां पदार्थोपस्थितीनां एकदाऽसत्वेन सर्वत्र समूहालंबनात्मिकां तावत्पदार्थो
पस्थितिमस्वीकारेणान्यथापदजन्यपदार्थोपस्थितिरूपशाब्दबोधहेतोर्विशेषणज्ञानरूपविशिष्टबुद्धि
हेतोर्विरहेण शाब्दबोधानिर्वाहात् तथाचासन्नस्थलेपि समूहालंबनतावत्पदार्थोपस्थितिस्वीकारे स्वस्यापिवा
व्यहितत्वेन तादृशपदार्थोपस्थितेरासत्तितया कथमनासन्नतदस्वीकारे उक्तकारणविरहादेव शाब्दबोधानुत्पादनि
र्वाहे अनन्यव्यवहितोपस्थितिरूपासत्तेः शाब्दबोधोपयोगितया नच भेदगर्भाव्यवधानविवक्षया क्रमिकोपस्थितीना
मेवासत्तितया अनासन्नस्थले च समूहालंबनोपस्थितिस्वीकारेपि क्रमिकविशेषण विशेष्योपस्थित्योर्व्यवहितत्वे
नासत्तिताविरहात् शाब्दबोधानुत्पत्त्या असत्वेनासंनयोर्विशेषः क्रमिकविशेषणाद्युपस्थितीनां शाब्दबोधाव्यवहित
पूर्वमसत्वेनपि अस्मत्सिज्ञानस्यैव शाब्दबोधहेतुतयानानुपपत्तिः अतएवासत्तिभ्रमादनासन्नस्थलेशाब्दधीक्रमिको

पस्थितीनामव्यवधानभ्रम इति वाच्यं· वाक्यघटकपदानां क्रमिकतया तेषां क्रमिकज्ञानस्यावश्यकत्वेऽपि अवान्त
९२ रतावसरे यत्र पदार्था नोपस्थापिता अपि तु समूहालंबनस्मृतिमारूढैश्चरममेव समूहालंबनोपस्थितिर्जनिता तत
प त्रासत्त्युपपत्तेः· यत्त्वन्वयप्रतियोगिन उपस्थितिर्यत्रेति वदुः श्रीहितान्वयप्रतियोग्युपस्थितिपदं अन्वयोपस्थापक
पदोपस्थितिपरं तादृशपदपरं वा न तथा च पदोपस्थितेः पदस्य वा अव्यवधानमासत्तिरिति। तदपि न तथा च सति सा च
स्मृतिर्नानुभवोऽतो नान्योन्याश्रय इत्युत्तरग्रंथासंगतेः अर्थोपस्थितेरासत्तितया पदार्थोपस्थितेः पदस्य वा परिचायि
कायाः· तस्याः शाब्दानुभवेऽनपेक्षिततया तस्याः शाब्दानुभवेऽनपेक्षिततया तस्यानुभवरूपत्वेप्यनोन्याश्रयाप्रसक्तेः प
दोपस्थितेः पदस्य च शाब्दानुभवरूपतायाः शंकानापोहात्तस्मिश्चासत्त्येकपदज्ञातीस्यानुव्यवधानेनान्यपदप्रतीतितास्यर्थ
मेव पदयोरासत्तिरत एव मौनिश्लोकस्थले मौनिना प्रतिसंधितानां विभिन्नकालोच्चरितपदानां व्यवहितत्वेऽपि वक्त्र राम·
तात्पर्यविषयपदानां चान्वयाबोधकत्वात् श्लोकादिस्थपदानां च व्यवहितानामपि अव्यवधानभ्रमो योजनयाक्रिय ९२

तेइत्यपि नतेषांव्यवधाननिश्चये नाव्यवधानभ्रमात्संभवात् अव्यवधानेनज्ञातस्यद्प्रतीत्यभिमतं यथा कथंचिद
व्यवधानेनान्वयप्रतियोगिनामुपस्थितिरुपयोगितया मूलस्यापि जात्दृशाभिप्रायस्यासत्तित्वे तात्पर्यस्याचेत्य
नभिधानं च यथाश्रुताभिप्रायेणोत्साहः वस्तुतो वृत्त्या पदजन्यपदार्थोपस्थितिरेवासत्तिः अव्यवधानेने
त्यादिमूलस्यापि स एवार्थः अव्यवधानपदस्याव्यवधानघटितपदजन्यत्वार्थकत्वात् तच्च स्मृतिरित्यादावन्योन्या
श्रयपदमात्माश्रयपरं उक्तासत्तेः स्वरूपसत्या एवाज्ञस्याहेतुत्वान्न साक्षादेव तदभावे तदपेक्षयान्योन्याश्रयामस
क्तेः उपस्थितेरनुभवरूपत्वेऽनुभवात्मकासत्तिनिर्वाह्यशाब्दसामग्र्याः शाब्दानुभवनिर्वाहकत्वमित्यन्योन्याश्र
यस्यैवप्रसक्तस्यात्तस्यदं यथाश्रुतार्थमेवः नीलो घटो द्रव्यं पटः इत्यादौ गिरिर्भुक्तमग्निमान्देवदत्तः इत्यादौ नीलपटागि
र्यग्निमदादिपदानां च नान्वयबोधः तत्तत्पदार्थान्वयज्ञातस्यैकवाक्यताभिप्रायस्य वा अभावात् यत्र तादृशंज्ञातस्य
र्यंतज्ञानतु हविलक्षणः कथंचित्तात्पर्यग्रहे वभवत्स्येव शाब्दबोधः न तु हकनयैव वचश्लोकादौ योजनोपयोगः

९३

९३ ल्लेखस्यास्य काव्यदोषतापि शाब्दी विलंबेन रसस्याविलंबादेवं साचेति अव्यवहितपदार्थोपस्थितिरूपासत्तिश्चे
त्यर्थः. सा तु भवत्विति यद्यपि भेदगर्भीव्यवधाननिवेशेनानुभवरूपतापत्तिः अनुभवार्थकपदार्थद्वयोपस्थि
तेः ऐकात्. तथापि दर्शितायाः अस्पष्टतायाः अभेदे व्यवधानशंकया अनुभवरूपतापत्तेः नासंगतिः. नान्योन्या
श्रय इति न वाच्यं व्यवहितविशेषणेनानुपपत्तिरिति शेषः. नानाविशेषणेति ककारशून्यः पाठः साधुः विशेषण
केति पाठे विशेषणापदादेव स्वार्थकः ननु बहुव्रीहिसमासान्तः कर्मकर्त्रादीनां च विशेषणत्वेन विवक्षितत्वाद् बहु
व्रीह्यसंगतेः तथा च कर्मकर्तृकरणाधिकरणक्रियादिरूपाणि यानि विशेषणानि तथा निष्क्रमिकाणि पदानि
वाचकशब्दास्तज्जन्यानां क्रमिकानां पदार्थोपस्थितीनां योगपद्युगपद्व्यवस्थानं संभवतीत्यर्थः उपस्थापक
पदानामुपस्थितिक्रमप्रयोजकत्वेनाभिहितं कर्मकर्त्रादीनां चैकत्र बोधविशेषणत्वमपेक्षितं कर्तृत्वस्य पस्थ
ले एव कर्मणो विशेषणता तथा तत्र कर्तुर्विशेषणत्वात्. संभवात्तु यागोऽइत्यत्रे क्षीरं चैत्रेण स्यादौ एकस्मिन्बोधे क्षीर

राम· ९३

दिरूपैककर्तृत्वविशेषणत्वं तथापि सर्वेषामेकबोधविशेषणत्वस्याविवक्षितत्वेन तदाक्षेपसमाधानाय समूहालं
बनस्मृतेः शाब्दबोधस्य स्वीकरणीयतया तदुपपर्यर्थं द्वयमाकांक्षितमित्यादिना अवान्तरवाक्यार्थबोधादेव महावा
क्यार्थबोधनिर्वाहे किं समूहालंबनस्मृतिकल्पनयेत्याक्षेपासंगतिः कर्मकर्त्रादीनां विशेषणानां परस्पराकांक्षा
विरहेण विशेषणद्वयादिविषयकावान्तरवाक्यार्थबोधासंभवेन समूहालंबनस्मृतेरावश्यकत्वात् धर्मत्वमात्र
स्येत्युक्तिः योग्यस्वार्थसंसर्गबाधकप्रमारहितसन्निधानं प्रपद्यते यदा पदार्थोपस्थितिस्स्वप्रधाने नोपस्थितिवि
षयो भवति तेन यत्कृतानामन्वितः स्वस्वोपस्थापितोऽर्थः पदैर्वावगम्यते तदनन्तरमेवानैतैः पदैर्बोध्यते तथा च घटमा
नयनीस्यादौ घटकर्मकानयनबोधात्पूर्वं घटकर्मकापनयनसकर्मत्वादिबोधोत्पत्तौ तादृशाबोधस्यैव पदजन्यघटाद्युप
स्थितिरूपस्य महावाक्यबोधे घटादिमात्सकत्वसंभवेन घटादिविषयकसमूहालंबनस्मृतिः कल्प्यते अपि तु चरमपदा
र्थस्मृतिमात्रमितिभावः एवमिति महावाक्यार्थबोधात्पूर्वं अवान्तरवाक्यार्थबोधजननेऽत्यर्थः अन्यथा तदाभिधानं

अवांतरवाक्यार्थस्य पदांतरसहकारेणावांतरवाक्यार्थेन सह पदार्थांतरविषयकज्ञानजननं विलक्षण्यापा
९४ ऽभावात्· जनितान्वयबोधत्वेन निराकांक्षतया तादृशैकबोधजनयित्वाद्बोधांतरजननासंभवात् एवमपीति·
प्रथममवांतरबोधजनने महावाक्यार्थबोधजननानुपपन्नावपीत्यर्थः· प्रथममनन्वये पूर्वमवांतरबोधानुमा
दहेत्वनुपपत्तात्तत्प्रयोजकत्वस्य दुर्वारत्वात्सामग्रीविरहे एववाक्यार्थतत्प्रयोजक इत्याशंकां निराकुरुते उत्तरस्यो
ह्यीति· उत्तरस्य महावाक्यार्थबोधस्य इदमवांतरवाक्यार्थबोधे जाते निराकांक्षत्वं· सामग्रीवैकल्यं सामग्री। विरहप्र
योजकत्वेनानुपूर्वस्य अवांतरवाक्यार्थबोधस्य न सामग्रीविरहप्रयोजकत्वं तत्सर्वमन्वयबोधानुपधानसत्वेन निरा
कांक्षत्वासत्वादिति भावः· तथा च सामग्रीबलादवांतरबोधस्य महावाक्यार्थबोधात्पूर्वमावश्यकत्वे महावाक्यार्थबोध
निर्वाहाय फलीभूतबोधात्मूलविषयकबोधाद्युपधानस्यैवाकांक्षत्वमभ्युपगंतव्यं पुत्रो राज्ञः पुरुषोऽपसार्यतामि राम·
त्यादौ तात्पर्याभावादेव राजपुरुषाद्यन्वयबोधः इति भावः· यद्यपि घटमानयतीत्यादौ घटकर्मकानयनादितात्पर्य ९४

केकर्थं प्रथमतो घटकर्मकादिमात्रान्वयबोधः तस्य तात्पर्याविषयत्वाभावात् नच महावाक्यार्थबाधासकतात्प
र्यस्येवावांतरबोधोत्तरकालतावत्पदार्थेति अवांतरवाक्यार्थे घटकपदार्थसमुदायेत्यर्थः उक्तैव समूहालंबनस्मृ
तिरेव सा चावांतरवाक्यार्थघटकार्थान्यस्यानुपरागेणापरस्योपरागेण वा अवगाहतां गतिरिति चरमपदार्थोप
स्थापकचरमस्मृतेरंतरा स्वीकरणीयतया अवांतरवाक्यार्थानुभवाविनाशे शाब्दबोधक्षणाव्यवहितक्षणपर्यंतं
तदसत्वात्तस्य स्मानुमितिरूपपदविषयकपदार्थोपस्थितेरपि विशेषणाज्ञानविधया +य+ किंतु क्वचिद्बोधे कर्मादीनां
नानापदार्थानां क्वचित्कर्त्रादीनां क्वचित्करणादीनां क्वचिदधिकरणादीनां क्वचित्क्रियादीनां विशेषणत्वेन विवक्षितं तं क्रि
यादिपदोत्तरादिपदस्य कर्मादिपदेनाभिसंबंधात्कर्मादीनामित्यादौ कर्मत्वक्रियादीनां विशेषणानामादिपदेन परिग्रहः त
था चौदनं काष्ठैः पचतीत्यादौ इव कर्मकरणादौ एकस्य विशेषणताऽस्त्वोदनं पचति काष्ठेन पचतीत्यादौ ओदनकर्मत्वयाका
दिविशेषणोपस्थितीनां योगपद्यासंभवेन शाब्दबोधानुपपत्तिप्रदर्शनपरोऽयं ग्रंथ इति तत्रापि समूहालंबनतावत्पदार्थ

95

९५ स्मृतिकल्पनं तु समाधानग्रन्थाभिमतं न च चोदनकर्मत्वयोः परस्परमन्वयसंभवेनावान्तरवाक्यार्थबोधान्महावाक्यार्थबोधो
पपत्तावपि न तात्पर्यसंगतिः मेलकाभावादिति मिलनाभावनियमादित्यर्थः क्रमिकोपस्थितीनां योगपद्यविरहेऽप्युत्तरकाले
समूहालंबनतावत्पदार्थगोचरस्मृतेः प्रत्येकस्मृतिजन्यसंस्कारसमुदायादवान्तरपदार्थानामस्मरणे प्राचीनानुभवजन्य
प्रत्येकसंस्कारसमुदायात्संभवेन तत एव शाब्दधीरिति समाधानेक्रमिकपदज्ञानानां योगपद्यासंभवे तेभ्यः समूहालंबन
पदार्थस्मृतेरसंभवात् अवान्तरसमूहालंबनपदस्मृतेस्तं स्वीकुरुते श्रोत्रेति क्रमिकवर्णसमुदायात्मकपदस्यैकपदात्म
त्वेऽपि क्रमिकतावद्वर्णानुभवानां पौर्वापर्यरूपानुपूर्वीविषयकत्वेन तत्तदर्थशक्ततावच्छेदकावच्छिन्नविषयकसमूहालंबन
पदस्मृत्युपयोगित्वेऽपि पदघटकोत्तरवर्णानां श्रोत्रलौकिकप्रत्यक्षे पूर्वपूर्वानुभवोपनीतानां पूर्वपूर्ववर्णानां ध्वंसबलरूपेण तत्त्व
स्वप्रकारतया संसर्गतया वा भानसंभवेन श्रोत्रप्रत्येकपदानुभवनिर्वाहः तत्तत्पदगोचरसमूहालंबनस्मृतिः अन्यत्रविष रा म.
यतिशेषः स्मृतिः संभवतीति शेषः संस्कारस्य स्वाविषयकज्ञानाजनकत्वनियमादिति भावः नचैवं प्रत्यभिज्ञानुपपत्तिः प्रत्यभिज्ञाया ९५
न तत्स्मृतेरेव हेतुत्वे योग्यमानत्वात् तन्न संस्कारस्य स्मृतिघटितत्वाद्वा उक्तनियमस्य तादृशनियमस्याप्रामाणिक इत्याशयेनाह वाक्या

र्थेति अन्यथानुपपत्त्या समूहालंवनस्मृत्यादिकं विनाऽनुपपत्त्या· फलवत्वेन वाक्यार्थवोधरूपवलेन· संस्काराणां प्र
त्येकपदार्थगोचराणां एकस्मरणाकल्पनात् तावत्पदार्थगोचरसमूहालंवनस्मरणकल्पनात् पदस्मरणो· पदस्मरण
जननेसहकारित्वकल्पनमितिदोषः यद्यपि प्रत्येकसंस्काराणां तावत्पदार्थगोचरस्मरणजनकत्वे विवदमानानामनुक्र
नियममभ्युपगच्छतां प्रत्येकवर्णगोचरसंस्काराणां वर्णसमुदायरूपपदस्मारितत्वेपि विवादसंभवाद्दृष्टांतासंगतिः
प्रत्येकवर्णानुभवसंस्काराणां आनुपूर्व्यविषयकतया तद्विशिष्टवर्णात्मकपदस्मारकत्वासंभवस्य: अतएव श्रोतपदानु
भवजन्यसंस्कारसमुदायादेव तावत्पदस्मृतिः स्वीकृता न तु तावत्पदघटकवर्णसमुदायस्य प्रत्येकानुभवजन्यसंस्कारे
भ्यः तथाप्यवांतरवाक्यार्थवोधसंभवस्थलेतत्र एव महावाक्यार्थवोधसंभवेन प्रत्येकसंस्कारेभ्यः समूहालंवनपद
पदार्थस्मृतौ विवादेपि अवांतरवाक्यार्थवोधेप्यपेक्षितकप्रत्येकवर्णानुभवजन्यसंस्कारेभ्यः पदस्मरणे विवादसंभवः
घकाले स्मरणं तत्क्षणोऽस्त्वन्नस्य उकारस्य द्वितीयपक्षेणोचेत्त्रिर्विकल्पकोत्पत्तिसमानतीयक्षणे तत्प्रकारेण श्रावण

96

९६ नुभवव्यवाहितप्राक्क्षणोत्पन्नघटध्वंसवत्स्वरूपाभावात्तुवत्वस्य पूर्वमज्ञातत्वेनप्रकारत्वासंभवात् ध्वंसस्यसं
बंधतयाअप्रामाणिकतयाअज्ञातस्यापितस्यसंबंधतयाभानमित्युपगमासंभवात्· तदानींस्वाकाररूपविशे
ष्यनाशेपितदुत्तरक्षणेघध्वंसविशिष्टघटत्वस्यासंभवात् नचशब्दजटकारोत्तरनिरोधकंध्वंसविसर्वैशिष्ट्या
वगाहिप्रत्यक्षंतत्संभवतीतिशब्दस्याप्यानवच्छेदकोत्तरदेशावच्छेदेनैवशब्दजनकतयाकर्णावच्छिन्नटकारोत्तराकर्णा
वच्छिन्नटकारोत्तरजननासंभवात्कर्णानवच्छिन्नशब्दस्यचाप्रत्यक्षत्वादित्याशयेनदृष्टांतसंगतिः प्रत्येकवर्णसंस्का
रमेलकाधीनपदस्मरणंचतावद्वर्णस्मरणमेवनत्वानुपूर्वीविषयकंतदनुपपत्तेर्मनसोपपत्तेर्मानसोपनी
तमानरूपानुपूर्वीप्रकारकज्ञानद्वाराशब्दधीसंपादकत्वात् आनुपूर्वीविशेषणविशिष्टत्वमेववर्णस्यश्रोत्रा
नुभवग्राह्यतामतएवादृष्टांतासंगतिः श्रोत्रेवमनमभेदेनचैतदित्यालोककर्हितोक्तंयत्रैकस्मिन्विशेष्येबहूनांविशे
षणतांकिंतुविशेष्येएकपदार्थोविशेषणंतत्रचापरपदार्थोविशेषणमित्यादिरीत्याविशेषणापरस्यरनानाविषय राम ९६

कोनानाविशेषणकोबोधः तत्रावांतरवाक्यार्थबोधस्यैवसामग्रीबलेननाँविशेषणविषयकमहावाक्यार्थबोधात्प्र
गुणत्वस्यविशेषणज्ञानेनतयापदजन्यपदार्थोपस्थितिरूपतयाचसमूहालंबनपदार्थस्मरणकल्पकाभावइत्याक्षिप
ति अथेतियद्युक्तमर्थसाकांक्षेत्याकांक्षायाअर्थपदज्ञानजन्यतयास्मृतित्वावछिन्नजन्यतायाएवनिवेशनीयतया
शाब्दबोधरूपपदार्थोपस्थितेःशाब्दबोधाहेतुत्वाहेतुत्वाच्चेतिभावः मिश्रास्तु उक्तेव्यतिरिक्तस्यमहावाक्यार्थघटकस
कलपदार्थानांविषयाकलितत्वभावेनविषयीकरणएकस्मृतिरेवगतिरित्यर्थः एकदैवतावत्पदार्थस्मृत्यांसत्यांमिति
पंथेननतथाविधस्मृतेरेवपूर्वमुक्तत्वात् तथाचपूर्वमवांतरवाक्यार्थधीसंभवस्थलेतन्मूलकस्यविशिष्टस्मरणस्या पि
तावत्पदार्थसमूहालंबनरूपाद्बाधकत्वादेवसंभवेनतावत्पदार्थस्मरणाभिन्नगत्यभावकथनविरोधइत्यालोच्यावांतर
वाक्यार्थबोधसंभवस्थलेसमूहालंबनस्मरणाभावाभ्युपगमपरतामस्तुतावदेवमित्यस्योपगमात्तथापिचरममित्यादिफ
क्किकयानीलःसुंदरोमहान्घटइत्यादिनानाविशेषणविशिष्टैकधर्मिबोधपरवाक्यस्थलेतात्पर्यविरहेणचपरस्परमन्वये

97

९८ नतास्यर्थविरहेणचैकविशेषणविशिष्टविशेष्येऽपरविशेषणवैशिष्ट्यभानासंभवेन महावाक्यार्थबोधस्या
वान्तरवाक्यार्थबोधपूर्वकतानसंभवति। नहि एकत्र विशेषणविशिष्टे परविशेषणवैशिष्ट्यभासके तथा सति
केवलमेकत्र द्वयमिति रीत्या बोधविलयप्रसंगात् नियमोनोभयोरेव विशेषणयोरुभयधर्मितावच्छेदकताप्रस
ङ्गश्चाविभक्त्यर्थकरणत्वादेः संसर्गतयाभानसंभवे काष्ठैः स्थाल्यामोदनं पचति चैत्र इत्यादौ आकांक्षायोग्यताविरहे
णकाष्ठस्थाल्यादिविशेषणानां मिथोऽन्वयासंभवेनावान्तरवाक्यार्थबोधानियमः करणत्वादेः प्रकृत्यर्थविशेष्यताम
तेनु काष्ठाद्यन्वितकरणत्वादिविषयकावान्तरवाक्यार्थबोधपूर्वकता महावाक्यार्थबोधस्य संभवतीत्यवधेयं। पदज
न्यपदार्थोपस्थितेरासत्तिविषयशाब्दबोधहेतुत्वमसहमानानामाक्षेपमुपन्यस्यति अत्र वेदन्तीति नचेति रीति। उप राम·
स्थितिरूपासत्तिरित्यर्थः शाब्दज्ञानमपश्यस्य शब्दजन्यातथा च शाब्दधीमोस्यत्तिकापदार्थोपस्थितिरेवासत्तिविषयान्व
न्वयबोधहेतुरितिनैयायिकासिद्धो नियमो नेति समुदायार्थः अत्र तदानीं पदजन्योपस्थितेरविषयः तदनंतरक्षणो

म्नशालित्वानुमतीयसंसर्गतान्यविषयताश्रयो न वेति विप्रतिपत्तिः ननु पदजन्यपदार्थोपस्थितिः शाब्दत्वावच्छि
न्नजनकताश्रया न वेति परमतेपि शाब्दबोधविषयपदार्थविषयकयोग्यतादिज्ञानादिरूपोपस्थितेः शाब्दत्वावच्छि
न्नजनकतया बाधात् नापि पदजन्योपस्थितित्वं शाब्दबोधहेतुतायामवच्छेदकत्वात् बाधापत्तेः नापि पदजन्यतदुपस्थि
तित्वं तद्विषयकशाब्दधीजनकतावच्छेदकं न वेति उक्तापत्तिवारणाय तत्तद्वाक्यार्थबोधपदजन्यतत्तद्वाक्यार्थघटक
वाक्यार्थोपस्थितित्वेन कारणतापेक्षया लाघवेन तद्विषयकशाब्दबोधे पदजन्यतदुपस्थितित्वेन हेतुतायाः पौरस्त्यसंगी
करणीयत्वात् न्यायमतेपि पदशक्तिलक्षणाज्ञानयोरनुगमासंभवेन शक्त्यादिज्ञानजन्योपस्थितेः पृथक्कारणताया
वश्यकतया तन्मिथो व्यभिचारेण व्यवहितोत्तरत्वस्य कार्यतावच्छेदके वश्यं निवेशनीयतया अध्याहृतानामपि कतिपया
र्थानां शाब्दधीविषयत्वसंभवात् इयांस्तु विशेषः न्यायमते वाक्यार्थघटकसकलार्थपदजन्योपस्थितिघटिता सामग्री
वाक्यार्थबोधे स्यादप्रयोजिका गुरुमते एकस्यैकस्य पदजन्यैकैकार्थोपस्थितिघटिताः सामग्र्य इति द्वारमित्यादावि

98

९८ तिपिधेही सादिकं विना द्वारमित्यादिकमेव पत्रस्थं तत्रेत्यर्थः अध्याहृतेन यदादन्यत्र चोपस्थितेनान्वयबोधदर्श
नात् द्वारकर्मकत्वादेरन्वयबोधदर्शनात् शब्द एव पिधानाद्युपस्थापकं पदं एवाध्याहृयते अत्र श्रुतपदसमभि
व्याहृतत्वेन ज्ञायते इति कल्प्यत इति शेषः तथा चोक्तनियमस्य न भंग इति भावः अनुपयोगादिति पदज्ञानस्य शाब्दबो
धानुपपादकत्वमित्यर्थः तत्तदर्थोपस्थापकपदार्थोपस्थितिं विना पितद्विषयकशाब्दबोधसंभवादिति यावत् तथा च
श्रोतुः शाब्दबोधस्य न तदीयपदज्ञानकल्पकतेति कल्पकाभावान्न तत्कल्पनसंभव इति भावः पदज्ञानस्य शाब्दबोधोप
योगित्वमपि तु अर्थोपस्थितिरिति विशेषे किं बीजं इत्याकांक्षायां अर्थस्य शाब्दबोधविषयतानुपदस्येति विशेषमा
हार्थस्येति अन्वयप्रतियोगित्वेन अ[illegible]न्वयप्रतियोगितया शाब्दधीहेतुत्वेन उपयो ए.म.
गित्वादिति उपयोगिज्ञानविषयत्वादित्यर्थः न त्वर्थस्य शाब्दधीविषयत्वे अर्थोपस्थितिरुपस्थापकपदोपस्थितिर्वा शा
ब्दबोधहेतुरित्यत्र किं विनिगमकमित्यत आह आवश्यकत्वाच्चेति पदोपस्थितेर्हेतुत्वे पदार्थोपस्थितेर्हेतुतया आवश्य ९८

कत्वादित्यर्थः ननु पदोपस्थितेः शाब्दबोधानुपयोगित्वेप्यर्थोपस्थितिं विना शाब्दबोधानुपपत्तिः करणत्वकार्थाप
त्तिः तदर्थकपदोपस्थितिं विषयीकरोतीत्यत आह अर्थापत्तिरिति उपपादकमात्रविषयत्वात् प्रतीतस्य व्यतिरेके
णानुपपत्तेः तन्मते कल्पकत्वानियम इति यावत् अन्यथाऽतिप्रसंगादिति भावः उक्तमावश्यकत्वं निवृणोति नचे
ति नहीत्यर्थः शब्दमात्रं निरपेक्षं शब्दोपस्थित्युपपादकं भवन्मतेपीत्यादिः तदर्थः तदर्थोपस्थितिरपि अन्यथापत्र
पदज्ञानमात्रेण तदर्थोपस्थितिस्तत्रापि शाब्दबोधापत्तेरिति भावः तथाच कथं शब्दोपस्थितेः शाब्दधीहेतुता वाच्येति शे
षः ननु तदर्थागोचरशाब्दबोधे तदर्थोपस्थितेः कारणत्वमावश्यकमस्तु तथापि धानार्थकपदश्रवणस्थलेपि तदर्थोप
स्थितिः तदर्थकपदोपस्थितिरपि प्रामाणिकतया व्यभिचारग्रहे तद्विषयकशाब्दबोधे द्वयोरेव नियतपूर्ववृत्तित्वरूपकार
णत्वकल्पनासंभवात् द्वारमित्यादौ विधानाद्युपस्थितेरिव तदर्थकपदोपस्थितेरपि कल्पनं स्तु घटं तत्र व्यभिचारेण
कारणत्वमेव किं नाप्यत इति वाच्यं अर्थोपस्थितिवत्पदोपस्थितेरपि नवच्छेदिधतया व्यभिचारानिश्चयात् व्यभिचार

११

९९ म

संशयस्य चार्थोपस्थितिसाधारण्यादित्याशंक्यान्यथासिद्धः पदोपस्थितिकारणत्वापवादकतामाह — व्यापकत्वे
ति॰ अर्थसाहचर्येण अर्थज्ञानसाहचर्येण शब्दस्मृतेः शाब्दज्ञानस्य तथा च शाब्दज्ञानस्याकारणत्वनिरूपेण तद्भिन्ना
शाब्दबोधानुपपत्तेः इति संधानुपोंकत्वेन पदज्ञानस्योक्तस्थले कल्पनाहमवश्यमिति भावः॰ ननु मा भूत्तदर्थविषयक
शाब्दबोधे तदर्थकपदज्ञानत्वेन हेतुता अन्यथासिद्धत्वात्तथापि पदजन्यपदार्थोपस्थितित्वेन तत्पदार्थविषयक
शाब्दबोधः तत्पदज्ञानजन्यपदार्थोपस्थितित्वेन हेतुत्वं ग्रहे बाधकाभावात्तादृशपदार्थोपस्थितेरेव शाब्दबोधोत्पत्तिप्र
तिसंधानेन पदज्ञानविषयिणस्तादृशपदार्थोपस्थितिकल्पनापादकस्थले तु मवश्यमत आहान्यथेति॰ अन्यथा पदज्ञा
नजन्यपदार्थोपस्थितित्वेन शाब्दबोधस्वीकारे पदबोधितस्यैव पदोपस्थापितस्यैव अन्वयबोधकत्वमन्वयबोधविषय
त्वं इति नियमशक्तिकल्पनापत्तेरिति॰ एतादृशनियमानिर्वाहकरूपावच्छिन्नकारणताकल्पनापत्तेरित्यर्थः अर्थाध्याहा राम॰
रवादिमते विशिष्टवैशिष्ट्यबोधसामान्यप्रतिविशेषणतावच्छेदकादिप्रकारकज्ञानस्य सर्वमतसिद्धतया तत एव निर्वाहे ९९

नशाब्दबोधे पदार्थोपस्थितिहेतुत्वं तत्राकल्पनादिति भावः॰ न च शाब्दबोधे पदार्थतावच्छेदकविशिष्टवैशिष्ट्यभा
नं न प्रतिनियतं पदार्थतावच्छेदकविशिष्टस्य परपदार्थे तद्धि विशिष्टेऽपरपदार्थे वैशिष्ट्यसंबोधितं तन्नापि लक्षणयापि
पदार्थतावच्छेदकभानादिति पदार्थोपस्थितेः शाब्दबोधे हेतुत्वं तत्र मावश्यकमिति वाच्यं तथा सत्यर्थज्ञानादेः पदार्थो
पस्थितिरूपत्वपार्थतद्धेतुत्वापेक्षया तु पस्थितत्वांशे शाब्दबोधवारणासंभवेन गुरुत्वात्पदार्थोपस्थितेः [redacted] स्वतंत्रहेतुत्वा
कल्पनात्॰ ननु द्वारमित्यादौ द्वारादिपदज्ञानमेवापिधानादिभासकत्वादिति शब्दाध्याहार आवश्यक इत्याशंक्य तत्स्वार्थे
ति स्वार्थान्वयवत्वे अन्वयप्रतियोगितया स्वार्थमात्रपरत्वेन पिधानाद्यन्वयबोधकत्वं अन्वयबोधे न पिधानादिभासकं त
दन्वयबोधार्थं अन्वयबोधे पिधानादिविषयकत्वनिर्वाहाय सकल्पनद्वारमित्यादौ पिधेहीत्यादिशब्दाध्याहार आवश्यकः
लक्षणयामिति लाक्षणिकपदस्थलासत्तिकगंगादिपदघटितवाक्यस्य घोषादिपदे गंगादिपदे लक्ष्यतीरादिभासकत
या स्वीकरणीयात्र स्वार्थतीरादिपदेष्वभिचारेण उक्तनियमासंभवादित्यर्थः॰ न वापीति न्यायमते पि कर्तुराक्षेपलभ्यत्वा

न्तुरोधेनाध्याहृतेन कर्त्रा क्रियान्वयबोधोपयोगमेनोक्तं नियमाभावाच्चेत्यर्थः अथ द्वारमित्यादौ द्वारादिपदस्याश्रुतप
दार्थविधानादिभासकत्वे द्वारादिपदस्य द्वारादिविषयकशाब्दबुभुत्सितत्वमिव स्वार्थविधानादिमद्बुभुत्सितत्वमपि कार्य
तावच्छेदकं वाच्यं अन्यथा तत्पदस्य स्वार्थभासकतानुपपत्तेरित्यस्यैकैव कपदस्यैव बहुतरकारणताकल्पनगौरवं त
था च लाघवात् पिधेहीत्यादौ पिधानादिशाब्दत्वावच्छिन्नं प्रति क्लृप्तकारणतापिधानादिशब्दस्य द्वारादिपदमात्रश्रवण
स्थले तत्पदसहकारेण पिधानादिबोधकं कल्प्यितुं युक्तमिति पदाध्याहार आवश्यक इति शंकते अथेत्यनि द्वारपदस
हभावमात्रं द्वारपदसहकारितामात्रं पिधेहि शब्दस्याध्याहृतस्य कल्पनेन तु द्वारपदस्य पिधानादिरूपार्थाध्याहारस
हकारितानदर्थभानप्रयोजकत्वमात्रपदलभ्योऽर्थः अनेकशब्दोपस्थितौ पिधेहि अच्छादयेत्यादिनापदोपस्थिति नियं
भवे विनिगमकविरह इति पिधेहि पदोपस्थितेः समानार्थकपदान्तरोपस्थितेर्वा विधानभासकत्वं कल्प्यते इत्यत्र वि
नियमकविरह इत्यर्थः अत्रैव नचेति संबध्यते संस्कारतावत्तस्येनेति नानापदगोचरसंस्काराणां कस्यचिदेव कदाचि

मनेकेषां।

द्बोधः नतु सर्वेषामिति विशेषणोस्यार्थः पदविशेषस्मृतेरिति एकपदस्यैवैकपदस्मृतेरित्यर्थः नानासंस्काराणां युग
पदुद्बोधकत्वेन समूहालंबनानुभवं विनापि समूहालंबनस्मृतेरावश्यकतया संस्कारस्याभिन्नविषयस्मरणजन
कत्वनियमोच्छेदप्रसंगादिति भावः एतदायातः संस्काराणां परस्परसमूहलंबनस्मृतिजनकत्वस्योपगमत्वेसं
स्काराणामपि युगपदुद्बोधे बाधकाभावाच्च परं तु एकदा पदस्मरणेपि न स्मृतिः स्मृतानां सर्वेषामेव पदद्वयभासकत्वोप
गमात्संभेदेन चान्यतरवैयर्थ्यात्तन्न च भासकभेदे भाष्यवक्तृन एकस्यापि विषयताभेदप्रसंगः एकदा घटोस्ति वा लशो
त्तीत्यादिसमानार्थकनानावाक्यश्रवणे तज्जन्यबोधे घटादिविषयितायाश्चाभेदादित्यैकैव तात्पर्यं अत्र च द्वारादिपदस्या
कांक्षादिमदितरान्वितस्वार्थविषयकशाब्दबुद्धित्वमेव कार्यतावच्छेदकमिति पिधानादिविषयकबोधे तस्य हेतुत्वासंभव
विरहेपि न क्षतिः उक्तकार्यतावच्छेदकगर्भस्वार्थस्यैव स्वार्थान्वयपिधानादेरपि विषयतयानिवेशनेतद्धर्मावच्छिन्नहेतु
तयैव स्वार्थभासकतासंभवात् न चाकांक्षा च जिज्ञासारूपा अर्थस्यैव धर्मे इत्यन्वयप्रतियोगिनश्चाकांक्षादिमत्त्वं उक्तधर्म

101

१०१

स्यत्वप्रदस्कार्यतावच्छेदकत्वमावश्यकमन्यथाशक्यपदस्य लक्ष्यार्थभासकतानुपपत्तात्तस्यान्वयबोधविषयत्वानिर्वा
हादिति समाधत्ते नेति स्वार्थपदद्वयार्थविषयकत्वावच्छिन्नहेतुत्वस्य लाघवेन पदस्वार्थस्यैवोपस्थितिकल्पनापेक्षयाऽ
र्थोपस्थितिमात्रकल्पने लाघवेनार्थाध्याहारात् अर्थाध्याहारस्यैवोपगमात्. नन्वस्वार्थपरत्वग्रहं विनान श्रुतपद
स्याश्रुतार्थभासकत्वनिर्वाहः स्वार्थप्रतीतिप्रयोजनकत्वरूपस्वार्थपरत्वग्रहस्थले च स्वार्थप्रतीतिपरत्वग्रहः संभवती
ति स्वार्थाभिन्नप्रवृत्त्वचसासामान्यतोऽर्थप्रतीतिपरत्वग्रहपरिशेषेऽपि च स्वार्थप्रतीतिपरत्वाग्रहान्न स्वार्थप्रतीति
परत्वाभावग्रहे सत्येव परिशेषानुमानप्रवृत्तेः यथा लक्षणास्थले इति द्वारमित्यादौ स्वार्थपरत्वागत्यमासोऽश्रुतपदे
अध्याहृतार्थपरत्वाग्रहेणानन्तद्भासकतासंभव इत्याशयेन शंकते श्रुतपदानीति लक्ष्यप्रयोजनानि गृहीतश्रुतस्वा
र्थप्रतीतिरूपप्रयोजनानि अध्याहृतेऽपि धानाद्यर्थे तात्पर्यतात्पर्यग्रहः श्रुतार्थान्वयानुपपत्त्येति हृतं यत्पदं तात्पर्य
विषयीभूतो यस्तदर्थसंसर्गप्रतीतिः अध्याहृतापरसंसर्गतिमानं विनान दन्वयानुपपत्तिस्तयेसर्थः अध्याहृते त्वन्व

एम०
१०१

गच्छतीयोग्यंतरेतात्पर्यज्ञानोपपादकतात्पर्यकल्पनात्वशंकतेकथमिति· नहीतिसमभिव्याहृतपदान्तरप्रस्थि
तशाब्दबोधोयमइत्यर्थः समभिव्याहृतमात्रान्वयः अत्रसमभिव्याहृतकपालादेः पाकाद्यनन्वयः स्यात्तत्वात्तस्मात
त्वेनान्वयसंभवात्तात्पर्यनियमात्तत्रतात्पर्यस्यओदननियतत्वात्कपालादावसत्वादितियावत्ः· तथापि
कथंनतदन्वयइत्याकांक्षायामाहयस्यइतियत इत्यादिःशब्दःयःशब्दःशब्दार्थःसएवतज्जन्यशाब्दबोधेविषयः
कश्चित्सहिशब्दार्थइतिपाठः तत्रहिरेवावधारणार्थःहिहेतावेवतस्यतज्जन्यतदर्थबोधेतस्यतदर्थपरत्वग्रह
स्यहेतुत्वादितिभावः तेनकपालाद्यन्वितपाकेउक्तस्थलेयद्वातोत्वात्पर्यसत्वेपिंदिनशाब्दबोधः तदासमभिव्या य
हारत्वानेहेतुतथातद्वारणांतदुभयोपस्थापितार्थयोरन्वयबोधेतदुभयसमभिव्याहारज्ञानस्यहेतुत्वात्तत्रअर्थाध्याहार
स्थलेचयावत्पदार्थोपस्थापकंततत्समभिव्याहारत्वानेमेवहेतुरितितोध्यंमायमतेविशाब्दबोधापेक्षायामाहान्यथेति
तात्पर्यानपेक्षायामित्यर्थः तथापिपदजन्मोपस्थितिहेतुत्वावाद्विनोविर्देववपशस्यतत्सपलक्षणांवाक्यांतरस्यकपालादि

पदोपस्थापिते नाप्यन्वयबोधापत्तिर्दृष्टव्या। कियापदेति पचतीत्यादिकर्तृत्ववाचकलकारे सर्वः कर्तुरनभिधानात्तृ
ममित्याहुः तत्पदद्वस्यावक्तुरप्युपस्थापनत् तृतीयासादिति अनभिहिते कर्तरि तृतीयानुशासनादिति भावः कर्तुरनभि
धानादिति न्यायपमतेह तावाख्यातशक्तिरिति भावः तथा च कर्त्रनभिधानस्य तृतीयानियामकत्वे न्यायमतेप्युक्त
स्थले तृतीयापत्तिर्दुर्वारेति दर्शितः कर्तृसंख्यानभिधानस्य तृतीयासाधुत्वनियामकत्वाद्याख्येन यां कते का त्रिति अभिहि
तेति। अभ्याहृतेमकारेणेत्यादिः कर्तृसंख्यानभिधानस्य तृतीयानियामकत्वइत्यादिः तृतीयापत्तेरिति कृतिसंख्यानभिधा
नादिति भावः यद्यप्यत्र कर्तृकर्मणोः कृतीत्यनेन षष्ठ्यनुशासनेन बाधादेव न तृतीयाप्रसक्तिः न च संबंधत्वेन कर्तृ
संबंधविवक्षास्थले तेन सूत्रेण षष्ठीविधीयतेश्च तः कर्तृत्वेन कर्तृत्वविवक्षास्थले तृतीयाप्रसक्तिरिति मिश्रोक्त
युक्तमिति तियाच्यं तर्हि देवदत्तपदोत्तरविभक्त्यतिरिक्तेनकर्त्रीरप्यनभिधानात्तस्याप्यभिधाननियामकतापक्षेपित्वत्तृती रा॰म॰
यापादुर्वारत्वात्। तथापि देवदत्तः पाचक इत्यादौ तृतीयापत्तिरेव संख्यानभिधानस्य तृतीयानियामकतापक्षे इत्यर्थाच्छुष्यं। १०२

देवदत्तश्चौदनमित्यादौ अध्याहृतेनापि कर्त्रनभिधानेन तृतीयाप्रसक्तिमुद्भूतमाशंक्ते तात्पर्यत इति आश्रयतासं-
वंधेन कृत्साद्यन्वयवोधनमेव कर्त्रनभिधानं देवदत्तश्चौदनमित्यादौ देवदत्ते आश्रयतया कृत्यन्वयवोधे तात्पर्यान्न तृ-
तीया देवदत्तश्चौदनं पचति इत्यादावाख्यातार्थस्य कृत्यर्थतामतेपि क्रियाया जन्यतासंवंधेनैव कृत्साद्यन्वयान्न तृतीया इ-
ति रीत्या तात्पर्याद्वे अस्माकं तृतीयानियम इत्यर्थः तुल्यमिति अथ अध्याहारस्थलेपि देवदत्तश्चौदनमित्यादौ अध्याहृतपाकादि-
कृते आश्रयतासंवंधेन अन्वये तात्पर्यान्न तृतीयापत्तिरित्यर्थः ननु इतरान्वितस्वार्थानुभवपदत्वेन सामान्यतो हेतुताग्रहज्ञा-
नं संभवति स्वज्ञानानुगमात् अपि तु तत्तदर्थविषयकवोधे तत्तदर्थपदोपस्थापकपदत्वेन विशिष्यैव तथा च द्वारानुभवे
यथा द्वारोपस्थापकपदत्वेन हेतुता तथा विधानानुभवे विधानोपस्थापकपदत्वेनापि हेतुता द्वारं विधेहीत्यत्र विधेहीति
द्वारोपस्थापकपदाभावस्थले त्वादौ विधेहीत्यादिशब्दाध्याहार आवश्यकः उपस्थापकत्वं शक्त्या अतो न लाक्षणिकस्या-
नुभावकत्वे साधारण्ये न शंकते न च इति अन्वयप्रतियोगीति संसर्गनिरूपके इत्यर्थः संसर्गनिरूपकत्वं च विशेषणताप्रेवावि-

103

शेष्यसंसर्गस्योभयनिरूप्यत्वादिति· विशेष्यविशेषणयोरेकतरोपस्थापकपदसत्त्वे परस्याध्याहारात्वाद्बोधोप
१०३ पत्तिरितिभावः तदुपस्थापकयावत्पदत्त्वेनेतियावत्तदुपस्थापकपदत्वेनेत्यर्थः अन्वयप्रतियोगिपद्यत्तदुपस्था
पकपदत्त्वेनेतियावत् न्यायमतेप्येकार्थोपस्थापके कपदज्ञानस्यैवापेक्षणाद्यथाश्रुतपदयोरन्वयविशेषणस्यप
रित्यागः· एवमितिएवंविधंपदमिति अन्वयप्रतियोग्युपस्थापकंपदमितियावत्विधानान्वयबोधस्थलेअध्याहृ
तविधानान्वयबोधस्थलेद्वारपदस्येवतथात्वादितिभावः द्वारान्वयबोधेद्वारान्वयप्रतिवाचकपदत्वेनहेतुताद्दष्टांत
विधयाप्रथमतोविधानान्वयबोधेविधिविधानान्वयप्रतियोगिवाचकपदत्ताधारत्वेनहेतुतामध्याहृतविधानान्वयबो
धार्थमेभिधत्ते एवमित्यविख्याचष्टुः· इदंतुचिंत्यतेसंवंधप्रतियोगित्वस्याव्यावर्तकतयाप्रकृतवाक्यार्थाघटकघटा
द्युपस्थापकपदादपिपदानुपस्थितिद्वाराविधानादिविषयकशाब्दबोधापत्तिः तत्तत्संसर्गविषयकबोधे तत्तत्संसर्ग ए.म.
निरूपकार्थोपस्थितित्वेनहेतुतयानायमतिप्रसंगइतिचेत् नर्हि अध्याहृतविधानस्याप्यन्वयबोधानुपपत्तिः द्वारादेस्त १०३

दन्वयाप्रतियोगिकत्वात् अत्राहुः तत्तद्वाक्यार्थवोधे न तत्तद्विशिष्टार्थघटकतावच्छेदकावच्छिन्नत्वोपस्थापकपदत्वेन हे-
तुत्वान्नोक्तदोषः द्वारत्वादेर्द्विकर्मकपिधानाकृत्यादिरूपविशिष्टार्थघटकतावच्छेदकत्वात् द्वारमित्यादौ तदनवच्छिन्नोप-
स्थापकपदसत्त्वे न तादृशविशिष्टार्थविषयकशाब्दवोधोपपत्तेः न चैवमपि पिधानादिविशेषितकृत्यादिरूपविशेष्या-
र्थविषयकशाब्दवोधे तादृशविशिष्टार्थघटकार्थोपस्थितिहेतुतायां द्वारकर्मकत्वादिविशेषिताध्याहृतपिधानादिविष-
यकशाब्दवोधे व्यभिचारो दुर्वार एवेति वाच्यं तत्तद्विशिष्टार्थविषयतानन्तःपातिविषयताशून्यवोधत्वस्य कार्यतावच्छेद-
कत्वोपगमात् न चैवं सति लाघवेन तत्तदर्थविषयकान्वयवोधेन तदर्थोपस्थापकत्वेन पदजन्यतत्तदर्थोपस्थितित्वे-
न वा हेतुत्वकल्पनाया एव उचितत्वात् पदाध्याहारस्यावश्यकः वाक्यार्थानन्तर्भावाद्दर्शितकार्यकारणभावोपगमे द्वा-
८ रादिरूपैकैकार्थघटितवाक्यार्थानामेव बहुतरतया पदार्थभेदभिन्नकारणत्वापेक्षया कारणतावाहुल्यापत्तिरिति वा-
च्यं वाक्यार्थानामपि सर्वेषाम् पदार्थतया लक्षणया घटादिपदार्थतया च पदार्थभेदेन कारणताभेदमते वाक्यार्थभेदे

105

नकारणतावच्छेदकत्वावच्छेदकतया तन्मात्र एव गौरवादिति तत्तदर्थविषयकशाब्दबोधे तत्तदर्थोपस्थापकपदत्वेन
१०४ हेतुत्वे बाधकाभावात् अन्यथेति गौणलाक्षणिकयोर्लक्षणया वृत्त्या पदोपस्थापितयोरित्यर्थः अन्वयबोधो न स्या
दिति शक्त्या तदुपस्थापकपदज्ञानरूपकारणाभावादिति भावः शक्त्या तदुपस्थापकत्वं कथं निवेश्यमित्यत आह त
योरननुभावकत्वादिति तयोर्गौणलाक्षणिकयोः पदयोः शक्त्योपस्थापनं नाभावे तयोरप्यननुभावकत्वं न स्यादिति
भावः आख्यातेपि धात्वाद्यर्थानामनाकांक्षितत्वान्नान्वयबोधे प्रवेशः संभवतीति सिद्धान्तयति क्रियापदेइति क्रिया
पदं धातुपदं धातुपदं तदुपस्थापितक्रिया धात्वर्थः कारकपदं कारकविभक्तिः तदुपस्थापितं कारकं कारकान्वयि कर्मत्वा
दिकं परस्पराकांक्षेति परस्परान्वितस्वार्थजिज्ञासारूपाकांक्षाविषयो भवतीत्यर्थः उपस्थितिमात्रं यथाकथंचिदुपस्थि
तमेवाकांक्षतीत्यत्र षंगेणान्वयः अन्वयविशेषजिज्ञासायां परविशेषजन्योपस्थितेरन्वयव्यतिरेकेण हेतुत्वादिति भावः राम०
अन्यथोपस्थितिमात्रस्यैव जिज्ञासारूपाकांक्षासंपादकत्वोपगमे विधेहीत्यनंतरमपि इदमानीतापीत्यपेक्षं बंधः विभक्त्या १०४

नुपस्थापितकर्मत्वादेः। क्रियासाकांक्षतोपगमेऽउक्तस्थले पिधाने द्वारकर्मत्वान्वयः प्रसक्तः। क्रियापदानुपस्थापित
क्रियायाः कारकविभक्तिसाकांक्षतोपगमे द्वितीयस्थले तत्प्रसंगः। क्रियाकर्माध्याहारे द्वेति तन्मते। क्रियायाः क
र्मणो वा यत्राध्याहारस्तत्रैव सर्वः। क्रियाध्याहारस्थलं द्वितीयं कर्माध्याहारस्थलं द्वितीयं दृष्टान्तः। यद्यपि द्वारं पिधानं
हृति द्वित्यत्र पिधानपदस्य धातुपदघटितत्वया तज्जन्यपिधानोपस्थितिर्वर्तत एव तथापि विङ्सायपर्थकपदसमभिव्या
हृतधातुरेव क्रियापदमित्यनेन विवक्षितं पिधानपदं वा पिधानोपस्थापकं तदादिपदानुकरणमित्यदोषः। कर्मण्यप्रकृति
कर्मत्वस्यस्यार्थस्तु स्वत्वात् प्रध्याहारस्थलपदान्नाधीनोपस्थितिस्थलसाधारणत्वात्' वैषम्यं शंकते एवं विधेति। क
र्मतापिधानादिपदोपस्थापितमेव कर्मत्वपिधानादेः पिधानकर्मत्वान्वये जिज्ञासा न भवति तादृशजिज्ञासां प्रति न त
स्यदर्जन्योपस्थितेर्हेतुत्वात्' अध्याहाररूपोपस्थितेनतद्धितोपगमे नतु अध्याहृतेन तत्पदन्वयजिज्ञासा न भवसैस्य बे
र्थः। तहीतितन्नत्यक्षाधानोपस्थितेरन्वयविशेषरूपजिज्ञासां प्रतिश्वहेतुत्वोपगमेऽस्यर्थः आकांक्षापांश्चन्वयवि

105

१०५

शेषजिज्ञासायां पदविशेषोपस्थापकत्वमिति॰ तद्विशेषजन्यैवोपस्थितिरित्यर्थः तत्र हेतुः ननूपस्थितिमा
त्रे तत्त्वाध्याहारसाधारण्युपस्थितिरित्यर्थः कर्मतापिधानादिजन्योपस्थितेर्व्यावर्त्तनाय पदविशेषजन्यत्वमो
पस्थितिकारणतावच्छेदकगर्भे विशेषणं निवेशनीयतयात्वादिति भावः नच कर्मत्वादिपदजन्यत्वमेव तज्जन्यो
पस्थितिव्यावर्त्तनायोपनिवेश्यं नतु विभक्त्यादिपदजन्यत्वमित्यध्याहारस्थले आकांक्षानिर्वाहः इति वाच्यं आ
मादिपदकर्मत्वादिपदविषयकसमूहालम्बनजन्यकर्मत्वाद्युपस्थितेरसंग्रहप्रसंगात् एतत्सर्वं जिज्ञासारू
पापाद्याकांक्षायाः शाब्दबोधहेतुतामतानुसारेणोक्तं वस्तुतः कारकान्वितक्रियादिविषयकशाब्दबोधो क्रि
याकारकसमभिव्याहाररूपाकांक्षाज्ञानस्य हेतुतया दर्शितस्थले शाब्दबोधवारणाय कल्पनीयतया क्रियामात्र
पदश्रुतिस्थले कारकपदाध्याहारः कारकपदमात्रश्रुतिस्थले च क्रियापदाध्याहारस्तदन्वयबोधानुरोधादाव ए.म.
श्यक इति तत्त्वं उक्तस्थले क्रियाकर्मभावेनान्वयबोधानुमतिर्न जिज्ञासारूपापाद्याकांक्षाया विरहात् जिज्ञासा १०५

योग्योपस्थितिमात्रस्य तन्त्रतया तत्रापि जिज्ञासोपगमात् अत्र विलक्षणसाधुत्वज्ञानेन प्रतिबंधादेव निराकांक्षत्वव्यवहा
रस्य साधुत्वादेवेति शंकते विशेष इति अत्र द्वारं कर्मत्वेनादौ द्वारमित्यस्याप्यसाधुत्वादिति विभक्तेः क्रियापदयोगे
एव साधुत्वादिति भावः तथा च साधुत्वज्ञाननिरासार्थं कारकपदे क्रियापदसमभिव्याहारज्ञानापेक्षया युक्तः पदा
ध्याहार इत्याशयः तदर्थयोग इति यथाकथंचिदुपस्थितक्रियान्वयतात्पर्यमित्यर्थः तुल्यस्मात् द्वारं पिधानमित्यादि
स्थले साधारणत्वात् तत्र जिज्ञासारूपाकांक्षोपगमे शाब्दबोधापत्तेर्दुर्वारतया जिज्ञासायां पदविशेषजन्याया उप
स्थितेर्हेतुत्वमावश्यकमिति पदाध्याहार आवश्यक इति भावः साधुत्वज्ञानस्य शाब्दबोधे हेतुतायाऽसाधुत्वज्ञानस्य
तद्विरोधितासंभवः जनकज्ञानादिविरोधिताज्ञानस्य प्रतिबंधकत्वायोगादित्युक्तं स्थलेऽन्वयबोधवारणाय पदावि
शेषजन्यत्वोपेक्षाऽवश्यकीत्याह साधुत्वज्ञानस्येति स्वप्रयोजकत्वात् स्वजनकत्वात् तदजनकत्वे हेतुमाह गौर
वादिति व्यभिचारमप्याह पदभ्रंशादिति अत्र पदभ्रंशस्थले असंसर्गाग्रहस्तूपस्थितपदार्थानां असंसर्गाग्रहमात्रं

106

१०६

नेत्यन्वयबोध इत्यर्थः तथा च तत्र साधुत्वज्ञानव्यभिचार इति भावः न चैतस्य हेतुमाह बाधकाभावादिति संसर्गबो
धे बाधकाभावादित्यर्थः साधुत्वज्ञानस्य हेतुत्वास्ति ह्यात तद्भावस्य बाधकत्वादिति भावः उपसंहरति तस्मादिति
पदपदानियदज्ञानपराणि एकं विनाऽपरस्येति अतः केवलकारकादिपदे क्रियापदाद्यध्याहारस्यावश्यक इति शेषः
पिधेहीति पदे विनेत्यादि पूर्वं साधुत्वार्थं पदाध्याहारापेक्षायामुक्तत्वेऽपि तत्तन्निर्भरः अपित्वाकांक्षानिर्वाहार्थं तदपेक्षा
यामेव अतो अर्थयोगसाधुत्वमाशंक्याह द्वारं पिधानमित्यत्राप्यर्थयोगसत्त्वे न साधुत्वमभिधायाकांक्षाविरहेण तत्र शाब्दबो
धो वारितः इदानीं साधुत्वार्थं पदाध्याहारस्यापि निर्भरं करोति अपि चेति क्रियापदे धातुपदे इत्यर्थः द्वितीयानुपपत्तिः द्विती
यासाधुत्वानुपपत्तिः धातूपस्थितार्थान्वयित्वेन एव कारकत्वात् कर्मसंज्ञाया अकारकाधिकारीयत्वात् तत्कारकस्य कर्मणि द्वितीयेत्य
नुशासनविषयत्वादिति भावः धात्वर्थस्यान्यत उपस्थितस्य योगे कारकत्वं कर्मत्वं चेत्साशंक्य निराकरोति न हीति क्रियापदार्थ
योगे इति अन्यत उपस्थितस्यापि धात्वर्थस्याप्यन्वय इत्यर्थः तात्पर्यविषय इति शेषः द्वितीयेति अनुशासनिकीति शेषः य

ए० म०
१०६

ट आनयनमिति। घटादयमेदविवक्षायामव घटमानयनमित्यादिः प्रयोगः ननु क्रियाकर्मभावविवक्षायां तद्वि
वक्षायां रुधियोगे षष्ठ्यनुशासनाद्घटस्यानयनमित्यादेरेव प्रयोगादतो घटमानयनमित्यादौ द्वितीयाप्रसक्तिर्न
घटते नापि घटस्यानयनमित्यादौ षष्ठ्यनुशासनविरोधः तथापि घटस्य तदित्यादौ आनयनाद्युपस्थापकतदादिपद
घटितत्वाद्द्वितीयाप्रसक्त्या शेषषष्ठ्यनुपस्थितिर्दृष्ट्यानयेत्यस्य च तथानुपपत्तिरित्यनेन संबंधः यद्ध्याहारं विना पद दा
योगं विना श्रोतुस्तत्पदाध्याहारं विना वक्तुस्तदेकवाक्यताभिप्रायेण चेत्यर्थः साधुत्वं यथा यथाश्रुतार्थसंगतेः अथवाप
दाध्याहारमिति यथाश्रुतार्थकपरमेव चतुर्थ्यनुपपत्तिरित्यस्य चतुर्थ्यर्थस्य भुक्तानुपपत्तिरित्यर्थो न तु तस्याः साधुत्वानुप
पत्तिरिति। अनुपपत्तिरिति स्पृहेरीप्सित इति सूत्रेण स्पृहधातुयोगे एवकर्मणः संप्रदानसंज्ञानुशासनादिति भावः स्पृ
हेरीप्सित इति सूत्रानुशिष्टसंप्रदानत्वबलादिति शेषः साधुत्वार्थं द्वितीयाचतुर्थ्योः साधुत्वज्ञानार्थमाहारमित्यादौ पिधेहि
पदाध्याहारः पुष्पेभ्यः स्पृहयति पदाध्याहार इति यथासंख्यमन्वयः अनुमन्यते क्रियते अन्वयबोधार्थं अन्वयबोधानुकू

107

१०७

लान्वयप्रतियोग्युपस्थित्यर्थं तस्यान्वयबोधस्य अन्वयप्रतियोगिज्ञानादेव पदजन्यान्वयप्रतियोग्युपस्थियगतो
पियोगं विना योगज्ञानं विना कारकविभक्तिरित्यत्रान्वयोयोग्यमित्यत्रान्वययोग्यतेति विपरीतन इत्यस्य संबंधः त
।क्रियापदं नान्वययोग्यमिति न शाब्दबोधजनकमित्यर्थः साधुत्वज्ञानस्य शाब्दधीहेतुत्वाभ्युपगमेनेदं केवलकारके
केवलकारकपदस्थले केवलक्रियायां केवलक्रियापदस्थले साधुत्वार्थं साधुत्वज्ञानार्थं तज्जन्यस्यैव क्रियादिपद
जन्यैवउपस्थितिः क्रियाद्युपस्थितिः अन्वयबोधोपयिकी क्रियान्वयबोधजनिका तादृशोपस्थितेः सर्वत्रसंभवेन
व्यभिचाराभावादित्याशयः इदमापाततः अपभ्रंशादप्यन्वयबोधे मानाभावेन च साधुत्वज्ञानस्य शाब्दधीहेतुत्वात्सा
धुत्वज्ञानार्थं तत्पदसमभिव्याहारज्ञानस्य क्वचिद्येक्षितत्वेपि यत्र प्रकारांतरेण साधुत्वज्ञानं तत्र तदपेक्षणात्तत्र च
ततत्पदसमभिव्याहारज्ञानं तत्रापि पदार्थोपस्थितेस्तत्तत्पदजन्यत्वानियमेनान्याधीनोपस्थितितः शाब्दबोधसतो
वाधकाभावेन पदजन्योपदार्थोपस्थितिं विना न शाब्दधीरिति नैयायिकमतनिर्वाहासंगोरवेणापदजन्यत्वस्योप राम: १०७

स्थितित्वनिष्ठहेतुताया अनवच्छेदकत्वात् न च मा भूत् पदजन्यत्वं कारणतावच्छेदकं तथापि पदजन्यैवोपस्थितिः का
रणं स्मृतित्वव्याप्यजातिपुरस्कारेण तस्या हेतुत्वात् तादृशजातेश्च पदजन्योपस्थितावनभ्युपगमादिति वाच्यं तत्तद
र्थविषयकबोधे तत्तदर्थज्ञानत्वेन हेतुत्वे गौरवाभावेन जनकतावच्छेदकतया जातिविशेषासिद्धेः न च पदजन्योपस्थिते
र्जनकत्वे गौरवाज्जनकत्वस्य तद्ग्राहकत्वे ज्ञानत्वस्याप्यतिप्रसक्ततया तदनवच्छेदकत्वासंभवात् तदनवच्छेदकतया
वैजात्यसिद्धेः शाब्दपक्षकतेति वाच्यं एवं घटादिजनकतावच्छेदकतया अवश्यं विनष्टदंडादिव्याहत्तायाः फलोपधायक
मात्रवृत्तिजातेः सिद्धिप्रसंगात् जातिपुरस्कारेण यदार्थोपस्थितेर्हेतुत्वेऽपि च घटादिविषयकशाब्दबोधजनकस्म
तोऽपटादेर्दृष्टबोधकांतराद्द्वयजन्यपटाद्युपस्थितिं विनापि त्वादृशबोधे निष्प्रत्यूहत्वाच्च । घटपदाघटान्वयबोध
जनकतावच्छेदकजातीनां भेदोपगमे च जातिसिद्धेः प्रसंगात् । तस्मात्स्वीकृत्य तावेव निर्भरः तत्रापि द्वारं पिधानं हृति
रित्यादौ द्वारकर्मकपिधानादिबोधमनुपपन्नं ततः केचिद्विवदंते न हि तत्रानुभवविरोधः अर्थाध्याहारवादिनां तत्र द्वा

108

१०८ रकर्मकत्वाद्यन्वयबोधोपयिकाकांक्षादिमद्द्वारद्वितीयादिपदानामध्याहृतपिधानाद्युपरागेणानिराकांक्षपिधाना
दियदोपस्थापितत्वतदुपरागेणापि स्वार्थबोधकतायाः स्वानुभविकत्वात्तादृशोपस्थितेरध्याहारोपस्थितेरविशे
षात् अनुभवविरुद्धंतु पत्रप्रकृतवाक्यार्थघटकस्यापि अर्थद्वयस्यान्वयबोधोपयिकीसाकांक्षतात्रान्वयः यथा
द्वारं कर्मतापिधानादिकृतिरित्यादौ न चैवं तत्रान्वयबोधवारणाय कर्मत्वाद्यन्वयबोधे द्वितीयाद्यन्तपदजन्योद्वारो
पस्थितेर्हेतुतायाः आवश्यकत्वे कथमध्याहृतद्वारकर्मत्वादेरन्वयबोधे भानमिति वाच्यं पदविशेषानुपूर्वीरूपा
कांक्षाणामेकविधान्वयबोधोपयिकीनां मध्ये अनुगमेन पदस्याध्याहारणीनबोधे व्यभिचारस्यापितावत्तैव वारणा
त् द्वारकर्मत्वादेरध्याहारे तदपि मानेन बाधकाभावः न चैवमुक्तसर्वनिराकांक्षस्थलेऽन्वयबोधस्यादेपि व्यभिचारा राम
प्रसक्त्या तत्रापि द्वारकर्मत्वादिघटितवाक्यार्थबोधापत्तिरिति वाच्यं द्वारकर्मकपिधानकृत्यादिरूपवाक्यार्थबाधो १०८
पस्थितेद्वारमित्यस्यानुपूर्वीज्ञानजन्यद्वाराद्युपस्थितिघटितापिधेहीत्यानुपूर्वीज्ञानजन्यापिधानाद्युपस्थितिघटित

सामग्र्यंतरस्य प्रयोजकतया उक्तस्थले तादृशसामग्र्योरेव तत्र सामग्र्या व्याप्यत्वसत्त्वेन तादृशबोधापत्त्यसंभ
वादिति अत्रेदं बोध्यं यद्द्वारमित्यादिसाकांक्षपदं प्रति धातुकृतिरित्यादिनिराकांक्षपदजन्यविधानाद्युपस्थि
तिसहकारेण विधानाद्युपरक्तद्वारकर्मत्वादिकमनुभवयेत् तादृशानुभवार्थं द्वारं पिधेहीत्यादिवत् द्वारं
पिधानमित्याद्यभियुक्ताः प्रयुंजीरन्न चैवमिति न च पदजन्याया एवोपस्थितेः शाब्दधीहेतुत्वे नैयायिकानां प
वतीत्यादेः कर्त्राक्षेपलभ्यत्ववादो विरुद्ध इति न आह कर्त्राक्षिप्यो हीति वक्ष्याम इति तत्रापेक्षया प्रथमं तिपद
स्याप्युत्तरसोपस्थितस्य तादृशप्रथमोत्पदलभ्यतयैव कर्त्राक्षेप इत्यतो पपत्तिरिति वक्ष्याम इत्यर्थः अनेन तदंतास्य
र्थस्यानिराकरणीयतया तत्रासत्तामिहैककार्यकारित्वसंगतिं दर्शयति तात्पर्याधीनमिति तत्तदर्थपरत्वज्ञानाधी
नमित्यर्थः शाब्दसामान्ये शाब्दस्य तत्तदर्थविषयकानुभवजनकत्वात् तत्तदर्थविषयकशाब्दानुभवे शाब्देन जनकी
ये तत्तदर्थपरत्वज्ञानस्य सहकारिताया इत्यर्थः अन्यथा अनेकेषामर्थानामुपस्थितौ सति चाकांक्षायोग्यतादिज्ञा

109

नेकस्याचिदेवशाब्दबोधो न सर्वेषां इत्यनुभवविरुद्धनियमस्याघातादिति भावः अतस्तन्निरूप्यत्व इति शेषः ज्ञत्वेति
१०९ ज्ञानत्वस्य दनिरूपकार्थकतया विषयतायाः तत्तत्पदार्थतया प्रवृत्तेः निरूपणाविषयीभूतमित्यर्थः तदेव पदं प्रयो
जनं यस्येति प्रयुक्तस्य प्रयोजनत्वस्य साधुत्वरूपतया तात्पर्यं तत्साधकत्वपर्यवसितमिति पक्षं निराकरोति
नेति यद्यपि तत्साधकत्वेन तत्साधनमेव पर्यवसितं तथापि परशब्दः साध्यार्थकः तथा च तात्पर्यमित्यत्र तत्पदपरप
दयोः बहुव्रीहिरेव न तु षष्ठीतत्पुरुष इति सूचयितुं तत्र साधनत्वमित्यनभिधाय बहुव्रीह्याश्रयणेन तत्साधकत्व
मित्युक्तम् एवमग्रेऽपि विशदार्थसाध्यत्वात् साध्यजन्यता तत्तथा च घटादिपदे घटादिगोचरप्रवृत्तिसाधनत्वमेव व्यवह्रियते
न तु घटादिपरत्वं तत्संसर्गपरत्वं वेति भावः तज्ज्ञो चेतितज्ज्ञो चेरेव प्रवृत्तिनिवृत्तीसाध्यत्वमित्यर्थः अत्र विशे
षार्थकसाध्यपदस्य पूर्वनिपातेन साध्यतज्ज्ञोचरप्रवृत्तिकत्वमित्येव वक्तुमुचितं तथापि तदेव पदं साध्यप्रवृत्तिनिवृत्ति राम•
कं यस्येति साध्यप्रवृत्तिनिवृत्तिकार्थकपरपदेन बहुव्रीहिणा तात्पर्यपदनिष्पत्तिरिति सूचयितुं एकपदार्थपरकस्या १०९

ध्यांशप्रवृत्तिनिवृत्त्यंशयोर्व्यवधानेनोपादानं तद्धेतुश्च प्रवृत्तिनिवृत्तिसाधनत्वमेव पर्यवसितार्थः प्रवृत्तिनिव
त्त्योः प्रयत्नत्वेनानुगमः घटमानयेत्यादिवाक्ये घटानयनादिपरत्वं विपरिणतिसुरसंग्रामफलपरिणतिविर
संकटवत्फलमित्यादिप्रशंसानिंदावाक्ये परिणतान्यमस्तुणादिपरत्वं संगमयंति तच्चेत्यादिना भाव्यार्थस्य कार्य
तार्थकवाक्यस्य साक्षात्प्रवृत्तिकारणकार्यताज्ञानजनने न स्वार्थस्य कार्यतावोधकस्येतरस्यांशस्य [redacted]
निंदावाक्यावेशेषयांप्रशस्तेतिप्रशस्तत्वेन निंदितत्वेन च परिणतत्वाद्यादिरूपात्स्वनिपावनद्वाराप्रशस्तत्वप्रकृष्टसु
खजनकत्वाश्रयत्वे निंदितत्वे च दुःखजनकत्वाश्रयत्वतज्ज्ञाने च तात्पर्यशास्त्रादिभोजनेच्छानिवृत्तिसाधनताज्ञानसं
पादकं वोध्यम् गंगायां घोष इत्यादिवाक्यस्य लाक्षणिकगंगादिपदस्य तीरादिपदत्वे कार्यताविषयकशब्दानुभवेनी
रादिभासकत्वोपगमेन तीरादिगोचरप्रवृत्त्यादिप्रयोजकत्वमुपपाद्य निर्वाहयति लाक्षणिकस्येति लक्षणाये इति ल
क्ष्यार्थानुभवद्वारेत्यादिः जनकत्वे प्रयोजकत्वेन तत्परत्वमित्यस्यान्वय इत्यादिः प्रवृत्त्यादिजनकत्वं न तद्योग्यताक तथा

110

सति लवणानयनादिपरस्य सैंधवमानयेत्यादिवाक्यस्य घटकानयनादिप्रतीतिप्रयोजकतया तद्धीचरमवृत्त्यादि
११० योऽप्यतात्पर्यानुपपत्त्या न तत्सत्त्वापत्तेः अपि तु तदुपधायकत्वमेव प्रवृत्त्युपधाना च पूर्वेण प्रवृत्त्युपधायकत्वं तु
निश्चयमिति प्रवृत्त्युपधानानंतरमेव तात्पर्यनिश्चयात् प्रवर्त्तकशब्दज्ञानोत्पत्त्या प्रवृत्त्युपधानमित्यस्योन्याश्र
यात्वानिरूक्ततात्पर्यज्ञानस्य शाब्दबोधहेतुतासंभवः इति दूषयतीत्येनेति तात्पर्यत्वेन तात्पर्यत्वनिश्चये तज्ज्ञाने तद्धी
चरमशाब्दबोधं जनयेतीति शब्दस्येत्यादिः तत्र प्रवर्त्तकत्वं तद्धीचरमवृत्त्युपधायकत्वमेव तात्पर्यत्वं तत्र शाब्दधीजन
कानिश्चयविषयीभूततात्पर्येऽतीतस्य प्रवृत्त्युपधानस्य प्रवृत्त्युपधायकत्वनिश्चयः अपेक्षणीयतयेतिशे
षः अननुभाविकत्वेपि अननुभावकत्वमतोपि लक्षणीयार्थपरत्वात् तात्पर्यत्वस्याव्यापकत्वात् तथा च तद्धी
चरमानुभवद्वारा तत्स्यात् तत्प्रवर्त्तकत्वायोगात् तात्पर्यत्वाभावप्रसंग इति भावः न चाल्लाक्षणिकस्याननुभावकत्वे राम
पि लक्ष्यार्थोपस्थितिद्वारा प्रवर्त्तकतद्धीचरमानुभवप्रयोजकतया तत्प्रवर्त्तकत्वमव्याहतमेवेति वाच्यं एवमपि ११०

तस्य स्वार्थसंसर्गपरत्वानुपपत्तेः काव्यादेरितिभाव्यार्थवाक्यघटकशंसावाक्यातिरिक्तवाक्यस्येत्यर्थः स्वरूपायो
ग्यमात्रपरत्वेन तत्तद्वाक्यार्थबोधमात्रजनकत्वेन मात्रपदात्स्वप्रवृत्त्यादिजनकत्वव्यवच्छेदः पर्यवसानात चारितार्थ
त्वात् तत्र यथा च तत्र तत्तदर्थपरत्वानुपपत्त्या तच्छाब्दबोधापत्तिरिति भावः परपदं तत्साध्यप्रवृत्त्यादिपरम् अपि तु साध्यबुद्धिवा
कार्थक्रमतो नाप्रवर्तकवाक्ये ऽव्याप्तिर्न वा प्रवृत्तिप्रधानस्य तास्यर्थापेक्षणीयत्वेतत्साध्ये नाह नचेति श्रुत्युभवः एकार्थ
परत्वेनार्थन्तरार्थान्तरस्य रत्वेनातिप्रसंगः नन्वेवं परिणतिसुरसमिस्यादिवाक्यस्य परिणतानम्रादिमक्षणपरत्वं प्रवृत्त्यादि
परत्वं न स्यात् तद्विषयकप्रवृत्तिजनकत्वेपि तद्विषयकज्ञानाजनकत्वादित्याशंक्याभिप्रायप्रस्तानिराकुरुते प्रशंसेति स्वार्थ
धीहेतुत्वेन स्वार्थधीहेतुत्वानुरोधेन तस्यैव नाद्दृशार्थपरमेव उपेयते हीति शेषः मात्रपदेन भक्षणादिपरत्वव्यवच्छेदः
स्वार्थपरत्वेन स्वार्थबोधकत्वानिर्वाहे स्वप्रतिपाद्यभक्षणादिपरत्वाभावे स्यात् इति विरहादिति भावः एवं सति तत्र भक्षणादि
परत्वव्यवहारं परशब्दस्य तत्साध्यप्रवृत्त्यादिविषयार्थकतयोपपादयति तत्त्वज्ञानमिति प्रशस्तानेन्द्रियस्वार्थज्ञानं चेत्स

111

१११ र्थः प्रशक्तिप्रयोजकत्वेन इष्टसाधनत्वेन ज्ञानक्रियायां निंदितात् निंदितत्वेनानिष्टसाधनत्वेन ज्ञानक्रियातः स्व
विषयप्रवृत्तिनिवृत्तीजनयतीति स्वविषयभक्षणादाविष्टानिष्टसाधनताज्ञानं संपाद्यते प्रवृत्तिनिवृत्तीज
नयतीत्यर्थः तस्य भक्षणादिपदं एवं तादृशवाक्ये प्रवृत्त्यादिपरत्वव्यवहारः प्रशस्तजन्यार्थकत्वोपपादनी
यः अन्यथा प्रवृत्त्यादिघटितलक्षणोऽव्यगतेः तस्य प्रवृत्त्याद्यप्रवर्तकत्वात् अननुभावकत्वादिति तथा च पूर्वल
क्षणाद्यवाच्यविशेषणालाक्षणिकव्याप्तिरिति भावः तयोरप्यनुभावकत्वोपगमे तद्दोषानवकाशात् पूर्ववदस्योसा
ग्रयमाह तद्बुद्धीति जननेन उपधानेन तत्पदं तत्सत्त्वनिश्चयः तत्सत्त्वनिश्चये च तद्बुद्ध्युपधानमिति शेषः त
ज्जननयोग्यत्वमिति तद्बुद्धिस्वरूपयोग्यत्वमित्यर्थः विवक्षणीयमिति शेषः तत्र शागपियोग्यतावच्छेदकनिश्च
यात्वनिश्चयमिति भावः एकत्रोच्चारणेति लवणादिरूपैकप्रसायनेच्छया उच्चरित इत्यर्थः नानार्थे सैंधवादिपदेना प्र.ग.
नार्थपरत्वे लवणादिपरतावदश्वादिपरतापि स्यादित्यतिप्रसङ्गोऽन्वयः लक्षणायां लक्ष्यतीरादिप्रसायनेच्छयोच्चरि १११

त गंगादिपदे मुख्यार्थपरत्वं प्रवाहादिपरत्वं चापि योग्यतासत्त्वादिति तत्तदर्थविषयकशाब्दबोधे वृत्त्या तत्तदर्थपदोपस्था-
पिकपदत्वेनैव स्वरूपयोग्यत्वात् स्यादेतत्तदर्थान्तरयोग्यतासत्त्वादित्यर्थः तत्र प्रतिपादकत्वं तन्निष्ठप्रतीतिजन्यतानि-
रूपकत्वं तत्प्रतिपत्तिनिष्ठजन्यतानिरूपकत्वमिति यावत् तत्प्रतिपत्तिश्चोक्तप्रकाराऽनुभवजनकत्वजनकतानि-
रूपकत्वयोः समनियमेऽपि भेदात् पूर्वलक्षणेऽपि भेदः विना तात्पर्यनिश्चयं विना तत्प्रतीत्युपधानं विना चेत् तत्प्रतिपत्ति-
निष्ठफलोपधानरूपजन्यतानिरूपकत्वरूपतात्पर्यमिति विशेषः प्रवाहाद्यप्रतिपादकत्वात् प्रवाहादिपरत्वव्य-
वहारानुपपत्तेरिति शेषः अप्रतिपादकत्वात् अनुभवनिष्ठजन्यतानिरूपकत्वात् लक्ष्यार्थपरत्वानुपपत्तेरिति शेषः
ननु तत्प्रतीतिपरस्य तदनुकूलसंबन्धवत्त्वं तत्प्रतिपत्त्युपधानात्प्रागपि स्वग्रहमिति नान्योन्याश्रयः प्रवाहादिपरत्वव्यवहा-
रस्य च न शाब्दबोधोपयोगिनिरुक्ततात्पर्यविषयकः अपि तु प्रवाहादिजनकत्वमेव लाक्षणिकपदस्य लक्ष्यार्थपरत्वमप्यु-
पपद्यते शाब्दबोधं प्रति तस्या जनकत्वेऽपि तदनुकूलक्षणारूपसंबन्धस्य च तत्र सत्त्वात् लक्षणा च पदनिष्ठा स्वाभिधाविनाभावः

निरूपकार्थ्यघ्राक्तत्वरूपोलक्ष्यार्थस्यस्ववोधानुकूलः संबंध इत्याशंकते अथेति विनाभावितीरं प्रतिपादयतितीदप्रतियस्त
नुकूलतीरनिष्टाविनाभावनिरूपकप्रवाहार्थकत्वरूपसंबंधवदित्यर्थः तद्विशेषणांगस्य रत्वनिर्वाहप्रयोजकतायाविवक्षि
तंतत्संतीरपरंजनेन विनापि मंचभिन्नेपुरुषसत्वेन पुरुषे मंचाभिन्नहानित्वमस्ताविनाभावाघिरहेपिपुरुषमंचपदस्यतात्पर्या
त् तथा च तदनुपपत्तिरित्यर्थः न च तादात्म्यसंबंधेन मंचस्य पुरुषप्रतिक्षेपता संबंधेन मंचस्यतात्पर्यमंचरहितत्वविशिष्ट
पुरुषप्रतिचतादात्म्यसंबंधेनतत्सव्यापकतयामंचपुरुषयोर्विनाभावलक्षणाव्यतिरक्तेवप्रत्यया विरहेणपुरुषस्यमंचवो
धकत्वासंभवेनतत्परत्वानुपपत्तेः किंचित्कारत्वाद्वस्तुनः शक्यस्य यः कश्चन संबंध एव लक्षणाघटकः नत्वविनाभावएवाभिधेया
विनाभूतप्रतीतिलक्षणेत्युच्यते इत्यादाविनाभूतेत्यत्रेनसंबंधमेव विवक्षितं तथा च मंचाः क्रोशंतीत्यादेरनानुपपत्तिं गंगायां घोषीत्या
शंकादोषांतरमाह गंगापदमितितीरादिप्रतिपादनेच्छयेत्यादि इत्यादिपदेन मुख्यार्थस्यापरिग्रहः स्यादित्यभिमेरासंबं रा.म.
ध्यते मुख्यो मुख्यार्थप्रयुक्तरसिद्धो घः गंगादिपदमित्यनुषज्यते गंगायांस्नायादित्यादिवाक्यमपितीरपरं स्यादिति समुदायार्थः अ ११२

विनाभावसमत्स्यतीरादौ प्रवाहविशेषरूपगंगादिपदार्थाविनाभावस्य एतद्दोषं समुद्दिधीर्षुर्लक्षणो विशेषांतरमंत
र्भावयति मुख्येति मुख्यार्थबाधितसमभिव्याहृतपदार्थसंसर्गकत्वे सतीत्यर्थः इतीति विशेषणादेयमिति शेषः तथा
च गंगायां स्नायादित्यादौ गंगादिपदस्य तीरबोधानुकूललक्षणारूपसंबंधवत्वेपि मुख्यार्थसमभिव्याहृतपदार्थसंसर्ग
बोधानंतीरपरत्वं अपि तु गंगायां घोष इत्यादिवाक्यस्य गंगादिपदस्यैव तत्परत्वमिति भावः तर्हि एतद्विशेषणोपादा
ने मुख्यार्थपरत्वेनेति गंगायां स्नायादित्यादिवाक्यस्य गंगादिपदस्येत्यादिः नस्यादिति मुख्यार्थबाधरूपविशेषणाभावा
दिति भावः नस्यादिति गच्छ गच्छसि चेत्कांत पंथानः संतु ते शिवाः ममापि जन्म तत्रैव भूयाद्यत्र गतो भवानित्यत्र प्रवासा
द्येतकांतप्रतिनायिकायाउक्तो मागच्छेति गमननिषेधपरत्वमपि नस्यादित्यर्थः गमनरूपमुख्यार्थेलोऽर्थस्यानुमतत्वस्य
बाधितत्वेनोक्तविशेषणासत्वात् न च कांतप्रवासे कांतायाः दुःखात्तत्तदनुमतत्वबाधाद्गमधातोर्गमनार्थत्वाभावेन ल
क्षणोत्थस्यत्वेनाउपपन्नमिति वाच्यं स्वगमनस्य कांतसमीहितत्वेन कांतानुरक्तायाः कांतायाः तत्रानुमतिसंभवात् अत्र ए

113

११३ वगच्छसिचेदित्यनेनकांतगमनस्यानुमतिहेतुतयाऽभिधानसंगतिःगमनाभावानुमतेरेवतत्रवाक्यार्थत्वेतत्रकांतग
५७ मनमवृत्तेरहेतुतयातदसंगतेः नचतत्रगमननिषेधोपदिनशब्दात्प्रतीयते अपितुगमनानुमतिरेवतदातत्रग
मनाभावपरत्वेनास्यैवैकस्याप्यनुपपत्तिः प्रदर्शितइतिवाच्यं शब्दात्प्रथमतोगमनाभावप्रतीतावप्युत्तरकालंतत्र
तीतेर्धूमोत्तीतिवाक्यस्यवह्न्यादिपरत्ववत्तादृशवाक्यस्यगमनाभावानुमतिपरतापर्यावसायकत्वात् तद्बोधेचालं
कारिकाणांव्यंजनाव्यवृत्तंतदधीनशाब्दबोधरूपः स्यायमतेतात्पर्यलिंगकानुमितिरूपः गमनाभावगोचरोक्तदनु
मतौतात्पर्यबोधयितुंएवमेवचममापीत्यादिसाकांतगम्यदेशोत्कजन्मायांसामभिधायतद्गमनस्यस्वकीयमरणहेतुत्वं
प्रतिपादितंगतइत्यत्रकस्यचिद्येनजन्मभवनापेक्षायाऽतीतत्वेवृत्रसाप्यतेनतत्प्राक्त्वलोपेक्षयेतिनविरोधः एतद्दूष
णाभिधानमुपलक्षणं एकार्थपरनामार्थान्तरपरतावत्संगोपि दृष्ट्यः प्रयोजनमेवपरपदार्थइतिसिद्धांतयतितत्प्रयो राम·
जनकत्वमितिनन्वेवंसैधवपदेलवणादिपरमितिव्यवहारानुपपत्तिः पदार्थस्यशाब्दाश्यतयानिर्विश्यमाणतत्प्रयोज ११३

नकत्वविरहादिसत्त्वाहत्तदर्थस्येतिपरपदसमभिव्याहृततत्तद्वलवणादिशब्दार्थस्येत्यर्थः प्रतीतिः तत्तदर्थप्रतीतिः
प्रवृत्तिनिवृत्तीतितत्तदर्थगोचरप्रयत्नः पदार्थंपदार्थबोधकमेवनतुप्रवर्त्तकं तत्प्रतीतिपरतयातत्त्वंप्रशस्तावाके
प्रशस्तार्थविनियोगाबोधकं अपितद्गोचरप्रयत्नपरतयातत्स्वरूपमुच्यतइतिपृथक्पृथक्प्रयत्नाभिप्रायार्थकत्वस्वीका
रात्तत्प्रतीतिपरंतत्प्रवृत्तिमित्यादौपरपदसमभिव्याहृतपदंयथाश्रुतार्थकमेवेत्यपिद्रष्टव्यंतत्तदर्थगोचरशाब्दबो
धेनतत्तदर्थप्रतीतिपरत्वमेवोपपद्यतेनतुप्रहत्यादिपरत्वमित्यवधेयंप्रयोजनत्वंनिर्वक्तुंसाध्यत्वादिरूपंतत्स्वरूपैर्ज्ञान्योन्या
श्रयादिनाप्रतिक्षिप्तिसाध्यत्वमितिप्रतिपाद्येतिप्रतिपाद्यः संबोध्यपुरुषः यस्यसंबोध्यपुरुषस्य तत्तदर्थप्रतीत्यादिभिन्न
मविषयद्वत्तइच्छाविषयः तंप्रतिवाक्यस्यतत्परत्वापत्तेरित्यर्थः इदमतिप्रसंगमुद्धर्त्तुंशंकतेतत्तदर्थेतिपरस्यतयाव्यवह्रिय
तेशब्दतत्स्वार्थस्यसाध्यत्वेनतत्साध्यतयाइच्छाविषयत्वनिवेशनंनिषेधः वस्तुतत्तदिच्छाव्यवच्छेदः तथाचसाध्यतयासंबो
ध्येच्छाविषयत्वमेवप्रयोजनत्वंतथाप्रतिचनातिप्रसंगफलितार्थः अत्रयदिसाध्यत्वंजन्यत्वंतदालवणापरमित्यादौ

115

११४ लवणादिपदं तत्स्मृतीति परं लवणाद्यर्थस्य शाब्दाजन्यतयाऽऽइच्छाविषयत्वासंभवात् यदि च साध्यत्वं तदा लवणादिप न
दस्य तत्स्मृतौ लक्षणा उपेयते शाब्दज्ञानस्य लवणादेरेव तत्त्वेनेच्छाविषयत्वरूपप्रयोजनत्वात् इति आशयः यत्र सं
बोधनानापुरुषाणां विभिन्नार्थविषयिणी शाब्दज्ञानस्य तेन विभिन्नार्थविषयिणी धज्ञा च एकार्थप्रसायनेच्छयैव शब्द
प्रयुक्तः तत्रानेकपरत्वापत्तिरिति दूषयति नेति इहधूमः इत्यत्र एकार्थप्रसायनेच्छया प्रयुक्तवाक्येजन्यज्ञाप्ये तिशाब्दप्र
योज्यानां धूमवन्त्यादिप्रतीतीनां तज्ज्ञाप्यानां धूमवन्त्यादीनां भेदेन साध्यस्य साध्यतया संबोध्ये या विषय एव बहु विष ल
तया वाक्ये भेदप्रसंगात् तात्पर्यभेदप्रसंगात् ननु सर्वेषां संबोध्यानां तच्छब्दसाध्यत्वेनैकसाध्यविषयिण्यो दिच्छाज्ञा
यन्ते इति नार्यदोष इत्यत आह प्रमिच्छावीति प्रतिपादकेच्छाविषयत्वमिति स्वसंबोध्यत्वेन प्रयोक्तृपुरुषेच्छाविषय
त्वमित्यर्थः प्रयोजनत्वमित्यनुषज्यते तथा च स्वसाध्यत्वेन स्वप्रयोक्तृपुरुषेच्छाविषयतत्कत्वं तत्परत्वमिति तत्त्वं फ एम
लितं लघुलक्षणमाह प्रश्वशब्द इति तदिच्छया प्रयुक्तत्वं तत्परत्वमित्यर्थः प्रयुक्तत्वं ज्ञापितत्वमो निश्लोकादिस्थले ११४

ऽभिधत्ति संहितशब्दज्ञानानुकूलो व्यापारो लिप्यादिः तत्तदर्थप्रतीतीच्छयाकृतः इति शब्दस्य तदिच्छयाऽनुच्चारितस्था
पितस्य इत्थं सा चेति शब्दप्रयोगानुकूला चेत्यर्थः उज्जितयाद्येति संबोध्यप्रकृष्टेत्यर्थः धीप्रवृत्तिनिवृत्तीति धीविषयाप्रवृत्त्यादि
विषया चेत्यर्थः तस्य रत्वमिति शब्दस्य तत्तत्स्वरूपीयग्रहस्यादिपरत्वमित्यर्थः नास्यैवं यथाः नानार्थप्रसाय नेच्छा न तु यदृच्छा
ग भिन्ना नार्थादिस्थले शब्दबोधविषयतानियामकं तदा नानार्थादिशब्दविषयविषयकेकानुसंधानेनैकार्थप्रसाय
नेच्छा ग भिं तु तात्पर्यमावृत्त्या क्रमिकनानार्थबोधेनापि चरितार्थं भवतीति तत्र आवृत्त्यैवार्थान्तरबोध इति शाब्दसमाधानं
दूषयितुमुपन्यस्यति नानार्थादिति नानार्थपदघटितादृश्यमानयेत्यादिनाकादित्यर्थः श्लिष्टादिति सुवर्णादिपदस्येत्यादितः
कांचनशोभनपदानुसंधानेऽर्थद्वयबोधकभिन्नपदानुसंधानवशाद्वा वृत्तिं विना युगपद्यार्थद्वयबोधस्यैकदा संभवादनेकेति
अनेककारकान्वितक्रियापदाद्बोधकान्न घटं पटं चानयेत्यादिवाक्यादित्यर्थः मुख्यलाक्षणिकपरान्न शक्यलक्षणोभय
परात् गंगादिपदघटितात् गंगायां जलं घोषास्तिष्ठतीत्यादिवाक्यादित्यर्थः आवृत्त्या क्रमिकतत्तद्बोधानुसंधानेन एकदे

115

वेतितात्पर्यविषयतावदर्थविषयकसमूहालंबनमितिशेषः सकृदुच्चारितस्यैकस्य पदानुसंधानस्य त्वसमाना
११५ र्थकपदांतरानुसंधानसमवहितस्य पदानुसंधानस्येति यावत् सकृदर्थेति एकार्थबोधविषयकत्वनिश्चयो
येनेत्यर्थः उभयस्यार्थबोधकत्वनिश्चयेनेति यावत् एवंचोच्चारितएकानुसंधानेऽनेकार्थपरत्वाभावात्तद्बोधेनो
भयार्थबोधप्रकारितायाऽसंभवादित्यर्थः अथ घटौ घटाइत्यादौ एकघटपदानुसंधानस्याप्यनेकघटादिबो
धकतयानोक्तनियमसंभवः नच सरूपैकशेषेण सरूपपदांतरलोपात्तत्प्रतिसंधानाद्घटादिबोधः तथाच तत्तत्पदा
नुसंधानेसमानार्थकपदांतरानुसंधानासमवहितत्वरूपमेकत्वमेव नास्तीति नोक्तनियमभंगः अतएवैकशे
षानुशासनसार्थक्यमपि अन्यथा एकेनपदेनानेकघटादिबोधसंभवेऽनेकघटादिपदप्रयोगाप्रसक्त्या सरूपपदां
तरलोपस्याबोधकतदनुशासनवैयर्थ्यापत्तेरितिवाच्यं तथापि घटमानयेत्यादि आनयनरूपादेरेकेन धातुपदेन ग.म.
बोधनान्नियमासंभवात् न च प्रातिपदिकमंतर्भाव्य तथानियमः तथासति घटं पटं चानयेत्यादौ क्रियापदेन एकेनापिन ११५

त्वेनानयनादिबोधनमस्तु वा न त्वावृत्तिस्वीकारविरोधात् अत एव नानावृत्तिविषयकबोधकत्वनियमो यगामो
न पि न संभवति उक्तस्थले घटपटानयनयोरेकमात्रैव बोधस्यापत्तेरावृत्तिस्वीकारविरोधात्तादवस्थ्यात् न वानेकवा
क्यार्थबोधकत्वाभावनियमोऽभिप्रेतः घटं वानयेत्यादि घटद्वयानयनरूपवाक्यार्थस्यैक्याद् घटं पटं वानयेत्यादौ
घटानयनपटानयनादिरूपवाक्यार्थस्य भेदात्सामंजस्यमिति वाच्यं पदार्थभेदेन तद्घटितवाक्यार्थभेदस्यावश्य
कतया घटं वानयेत्यादौ वाक्यार्थभेदस्याविचारसहत्वात् न चैकपदानुसंधानजन्यबोधे तदर्थनिष्ठानेकविषयता
कत्वाभावनियमः घटं वानयेत्यादिवाक्यजन्यबोधे घटानयनत्वपटानयनत्वादिविभिन्नधर्मावच्छिन्नविषयताद्व
यादिवच्छेदकभेदाद्भिद्यत इति नानुपपत्तिरिति वाच्यं घटं वानयेत्यादिवाक्यजन्यबोधे एकघटानयनविषयताया
अपरघटानयनविषयताभेदे यत्रानयने यद्घटकर्मत्वं बाधितं तदानयननिष्ठविषयतायास्तदानयनावृत्तित्वाद्
घटकर्मत्वावच्छिन्नतद्घटानयनादिनिष्ठविषयताभेदेन तद्बोधस्य तदवृत्तिधर्मावच्छिन्नतन्निष्ठविषयताकत्वेनम्र

116

११६ मत्त्वप्रसंगात् तत्र विषयताभेदस्यावश्यकतया तादृशानियमे व्यभिचारात् न च तत्तद्विषयकैक्यानुसंधान
जन्यबोधे मिथो विलक्षणानदर्थविषयताविरहनियमः मिथो विलक्षणत्वं च परस्परानवच्छिन्नप्रतिबंधक
तानवच्छेदकत्वं घटं पटं चानयेत्यादिवाक्यात् समूहालंबनबोधे घटपटानयन विषयतायाः आनयने घटक
र्मकं न वा आनयने पटकर्मकं न वेति संशयनिरूपितपरस्परानवच्छिन्नप्रतिबंधकतावच्छेदकतया मिथो विलक्षण
मित्येकबोधे तदुभयासंभवाद्देवैवानयनद्वयबोधः घटं वानयेत्यत्र घटद्वयानयनत्वेनानयनद्वयविषयताया
निरुक्तवै[illegible]लक्षण्ये प्रमानप्रकारकत्वेनैव विपरीतज्ञानस्य प्रतिबंधकतया तद्घटानयननिष्ठतारूपावच्छिन्नवि
षयतायाः तदानयने तद्घटीयत्वकोटिकसंशयविरोधित्वं अन्यघटानयननिष्ठतद्रूपावच्छिन्नविषयताया
अपि तदानयने तद्घटीयत्वकोटिकसंशयविरोधितावच्छेदकत्वादिति वा अयं घटपटावानयेति वाक्यात् समूहालंबन रा.म.
विलक्षणस्य आनयनत्वावच्छिन्ने युगपद्घटपटकर्मकत्वोनयं विशेषणतया वाग्राहि नो बोधस्यानुपपत्तेः तादृशबोधे घट ११६

कर्मकत्वावच्छिन्नायाः तदानयनविषयितायाः कर्मत्वावच्छिन्नायाः तदानयनविषयतायाश्च निरूक्तवैलक्षण्यप्रसक्ता मन्न
न चैत्रानयनस्यैव क्रमेणानयनबोधद्वितीयान्तघटपटद्वयपटपदयोः सामर्थ्यविरहेणाद्वैधानुपपत्तेः अत्रोच्यते एक
पदानुसंधानजन्यबोधे एकविषयतानिरूपिततत्तदर्थविषयताद्वयाभावनियमाभिप्रायकोऽयं ग्रन्थः घटावानयघ-
टपटावानयेत्यादौ आनयनभेदेन विषयताभेदेऽपि तदुभयविषयतानिरूपिता आनयनत्वस्य शक्यतारूपविषयता एके
बोधेयत्ने विषयताभेदविरहात् घटं पटं चानयेत्यादिवाक्यात् समूहालम्बनबोधसंभवः घटानयने पटानयनमिति समूहाल-
म्बनबोधे न तदानयनविषयतानिरूपितानयनत्वविषयतायाः अपि भेदात् समूहालम्बनबोधस्य प्रत्येकज्ञानोत्पादकसामग्री
समुदायाधीनतया प्रत्येकज्ञानीयविषयताद्वयनियामकवशात् द्विविषयिताद्वयसंबंधात् अन्यत्र तु वृत्त्या क्रमेणानेकार्थ
बोधस्वीकारः अथैवं सरूपैकशेषानुशासनमफलं घटावित्यादौ द्वित्वघटानयनाद्येकैकविषयतानिरूपितनानावि
षयताशालिबोधस्यैकेनापि घटादिपदेन जननसंभवात् न च नाना घटविषयतानिरूपितघटत्वाद्येकैकविशेषणतानिष्ठना

नाविषयतायादृशबोधेनतासर्थ्यघटाविस्मादिवाक्यप्रयोगोपपत्तयेतदनुशासनमितिवाच्यंतत्रासमार्थ्येनद्वंद्वाप्र
 सक्त्यासरूपैकशेषस्यद्वंद्वापवादकताविरोधादितिचेन्नानुशिष्यतएवकर्तेद्वादिव्याकरणप्रणेतृभिःसरूपैकशेषः
भगवान्पाणिनिस्तुएकंप्रातिपदिकंनानेकस्वार्थविषयकैकबोधजनकमितिनियमाभिप्रायेणसरूपैकशेषमनुशा
सइतिकृतंविस्तरेणाविशेषदर्शनस्येच्छायामविरोधितयातज्ज्ञानकविघटनेननतत्रएवविरोधित्वेपिविशेषदर्शनस्यसा
र्वत्रिकतयातत्सद्विषयकमेकमनुसंधानंएतत्सदस्वार्थद्वयंबोधयतुतत्सदमर्थद्वयविषयकैकबोधंजनयत्विइत्यभि
प्रायेणवक्तुःक्वचित्संभवत्स्वेवतत्कलादकुस्थलेएकदाऽनेकार्थबोधोदुर्वारःनचतासर्थ्यस्थलेपिपदानिराकांक्षवाक्या
र्थतात्पर्यविषयान्वयधीस्तथाप्रकृतेउपदर्शितघटिततात्पर्यसंभवेप्युक्तनियमभंगभयेनानेकार्थविषयकैकबोधा
नभ्युपगमइतिवाच्यंउक्ततात्पर्यघटितानेकार्थबोधसामग्र्याएकदासत्वेनकलादेकदानेकार्थबोधोउक्तनियमभंग
स्यबाधकत्वासंभवात्एवमेकानुसंधानाघनंतर्भावेनइदमर्थद्वयंबोधयतितात्पर्यकारणत्वेच्छातत्रत्कमिकबोधेनतद्विष

यत्सिद्धावपिसामग्रीवशेनयुगपदनेकार्थबोधोदुर्वारः नचसमानार्थकपदद्वयानुसंधानदशायामेवोभयार्थविष
यकबोधस्यप्रसिद्ध्यानतदभावादेवनयुगपदुभयबोधइतिवाच्यंएकार्थपदानुसंधानजन्यैकार्थबोधोत्तरमपरस्मा
जदनुसंधानादर्थांतरबोधस्यभवतापिस्वीकारात्प्रथमानुसंधानस्यापिसामान्यतःतस्यदीनुसंधानत्वेनार्थांतरहेतु
तायाःप्रथममर्थांतरबोधसामग्र्याश्चसत्वेनप्रथमंतद्बोधस्यदुर्वारत्वात्पदिचतत्तदर्थबोधोपधायकतत्तदनुसंधा
नव्यक्तिविरहात्तत्तदर्थबोधसामग्रीविरहः नियमभंगभयेनतत्तद्व्यक्तित्वावच्छिन्नोपधायकतत्तद्व्यक्तित्वावच्छिन्नानुसं
धानाभावकूटस्यापितत्तदर्थविषयबोधत्वरूपसामान्यधर्मावच्छिन्नाभावप्रयोजकत्वोपगमादित्युच्यतेतदापिकस्यार्थ
स्यप्रथमंकस्यार्थस्यचरमंबोधउपेयतेइत्यत्रविनिगमकदुर्भिक्षमितिवाच्यंयुगपन्नानार्थबोधोदुर्वारइतिनाहन्नेरवका
शःइत्यरुतासरुतास्यपर्याभ्यांआहात्रब्रूमइतिअनेकार्थप्रतीतीच्छयेतिइदमश्वपदंविभीतकंपाशाकंचबोधयत्वितिसमूहा
लंबनादीच्छयेत्यर्थःएकमुच्चारणमेकाश्वपदानुच्चारणंभवत्येवभवतीतिनिर्विवादमेवपुनरिच्छायाःजन्येच्छायाःतत्रहि

118

११८ षयमात्मकसामग्रीसत्त्वे एकविषये वेच्छानान्यविषये इति वियनियमस्याशक्यत्वात् आवृत्तिकल्पनानुरोधेनापि भवता एक
पदेनानार्थप्रत्यायकत्वप्रकारके च्छास्वीकृत्य साहि पदे चेति तदुच्चारणं समूहालंबनबोधजनकत्वेन तदनुमतं अश्वादिप
दोच्चारणानानेकार्थपरत्वानानेकार्थप्रत्यायनेच्छाधीनं स्यावृत्तिरपि नस्यात् तत्रावृत्तिकल्पनमपि निर्बीजं स्यात् तात्पर्यनि
र्वाहार्थं तात्पर्यविषयानेकार्थबोधनिर्वाहार्थं अन्यथा तात्पर्यविषयबोधानुरोधं विनाप्यावृत्तिकल्पने एकपदेप्येकार्थबो
धकतया सर्वमतसिद्धपदेपि अत एवानेकार्थप्रत्यायनेच्छया एकपदोच्चारणासंभवादेव तदुच्चारणस्य एकपदोच्चारणस्य
उभयपरतापां उभयार्थपरत्वस्यैकदाग्रहेणावृत्तिकल्पनमिति स्यावृत्तिं विनैव एकदोभयार्थबोधासंभवेन तात्पर्यविषय
यनिर्वाहादिति भावः नानार्थपदाद्युगपदुभयान्वयबोधमुपसंहरन् द्रढयति तस्मादिति अनेकैकारकान्वितक्रियादिपदा राम·
द्युगपदनेकार्थानुभवमेवं घटं पटं चेत्यादिना अप्युपसंहरति तिनिषेद्धुमशक्यत्वात् विनिगमनाविरहेण प्रथमं कथंचिदेका ११८
र्थबोधसामग्रीकल्पनयापि निर्वाहेपि तु मशक्यत्वादित्यर्थः नानार्थस्थले एवैकदा नानार्थबोधविरोधेनोपगमासंभवमाशं

कत्वे अथेति अर्थान्तरभासकतास्यर्थज्ञानाद्यसमवहितादनुसंधाने सिद्धसाधनवारणाय विवादाध्यासितमिति न च पक्ष
तावच्छेदकोक्त्या दवच्छेदकावच्छेदेन साध्यसाधने अंशतः सिद्धसाधनमिति वाच्यं अवच्छेदकावच्छेदेन साधनस्याभ्येनांश्यप
क्षपतीसादौ इंद्रियेणाविभातकमिसाकारकाश्वपदार्थद्वयविषयकबोधजनकाश्वपदानुसंधानेऽंशतो बाधासंभवात्
विवादाध्यासितं चानेकशक्तिविषयानुभावकत्वेन प्रतिपाद्यानुमतत्वं अनेकशक्तिविषयार्थभासकतास्यर्थज्ञानादिसम
वहितत्वं वा यदि चावच्छेदकावच्छेदेन साध्यं साध्यते तादात्म्येनाश्वंपदस्यपतीसादावेवाबाधकं अश्वपदसमानार्थपदं
तदनुसंधानासमवहितत्वरूपमेकत्वमेवानेन विवक्षणीयं न तु तथाप्यनुभवानुपधायकेऽश्वपदानुसंधाने बाधोऽवी
रः साध्यघटकाभावदलाभावादिति वाच्यं भावदलस्य साध्यघटकत्वे अनुभावकत्वेनापि पक्षस्य विशेषणीयत्वात् उच्चारणा
परमनुसंधानपरं आवृत्तानानार्थबोधे प्येकोच्चारणासहेतुतया यथाश्रुतासंगतेः एकशक्तिविषयमेकमेवानुभावयतीति
पाठः अर्थद्वयाननुभावकत्वरूपस्य तत्र एकमेवानुभावयतीत्यनेनाक्त्यात्र साध्यत्वे समभिव्याहृतपदान्तरार्थबोधकत्वेन

119

११९

बाधः अत एकशक्तिविषयमिति एकपदशक्तिविषयमित्यर्थः शक्तावैकास्यविशेषणत्वे एकस्याशक्तेर्विषयीभूतं
दर्थद्वयं तदनुभावकत्वस्य साध्यतया नानाशक्तिविषयनानार्थानुभावकत्वाप्रतिक्षेपात् एकशक्तीत्यनेनैकपद
स्यशक्तेर्विवक्षणे एकपदशक्तिविषयद्वयाननुभावकत्वलाभेन तत्सिध्या एकपदनानापर्यायपक्षेऽपि नानार्थानां
मुग्रहबोधस्याप्रतिक्षेपनिर्वाहः एकशक्तिविषयमेवेति कश्चित्साहुः तत्रापि एकमित्यस्य स्वपूरणे नोक्तार्थलाभः घटो घटा
इत्यादौ घटादिपदे शक्तिविषयघटद्वयादेर्बोध एकशेषानुशासनलुप्तघटादिपदोत्तरानुसंधानादेव भवति तद्बोध
जनकघटकपदानुसंधाने च न व्यभिचारानवकाशः अश्वेनाश्वं पश्यति अश्वेन विभीतकं पश्येत्यादौ वा कार्यबो
धजनकाश्वादिपदानुसंधाने व्यभिचारवारणाय हेतुस्थैकपदस्य स्वविषयपदसमानार्थकपदद्वयानुसंधाना
समानकालीनत्वरूपानुसंधानरूपो कारणपदार्थविशेषणीभूतैकार्थकतोपगमात् उक्तघटादिपदानुसंधाने
च तदभावात् विषयत्वे च विशेष्यत्वरूपं निवेश्यं तेन जातिव्यक्तिरूपानेकार्थबोधकघटादिपदानुसंधानेन व्यभि

राम० ११९

चारः पुष्पवंतादिपदस्योच्चरे एकानुसंधानेन तत्तद्दशक्तिः विशिष्य सूर्याचंद्रमसादिरूपनानार्थेषु युगपद्बोधके व्यभि
चारवारणाय विरुद्धनानाधर्मावच्छिन्नविशेष्यकैकशक्तिमत्पदादिविषयकत्वेन हेतुघटकानुसंधानं विशेषणीयं
तत्र च शक्यतावच्छेदकभेदेपि न शक्तिभेदः तथा सति नानार्थादिव शक्तिभ्रमं विनापि तादृशपदात्सूर्यादिरूपस्यैकैका
र्थस्य बोधापत्तिः अवच्छेदकभेदेपि अवच्छेदकतापर्याप्त्येकत्वव्याप्तसत्त्वेनावच्छेदकद्वयादौ तत्प्रयोगभेदेन शक्तिभेदापत्तिः
श्चैतत्पदशक्यद्वयाननुभावकत्वं च स्वविषयेयोऽस्तु द्विन्न उच्चकैकपदशक्याविषयकानुभवानुपधायकत्वं स्वपदार्था
ना ऽनुभवः एतेनानेकेषामपि प्रत्येकमेकत्वेन नानापदशक्यानां नानार्थानां शाब्दबोधे भानेन बाधादिप्रसंगो निरस्तः स्व
विषयत्वेन तादृशं पदं विशेषणीयं तेनाश्वारूढ इंद्र इत्यादिवाक्यार्थानुभवस्य हर्यादिपदशक्यद्वयविषयकस्य जनके
अश्वादिपदानुसंधानेन व्यभिचारः तादृशानुभवस्य हर्यादिपदशक्यत्वविषयकत्वेपि तादृशहर्यादिपदस्याश्वादिप
दानुसंधानाविषयकत्वेन तादृशानुसंधानं स्वपदेनोपादाय एकपदशक्यत्वविषयकत्वस्य तज्जन्यानुभवे दुर्निवहत्वा

120

न्यत्र हर्य्यादिपदविषयकं तादृशाश्वादिपदानुसंधानं तत्र तादृशानुसंधाने निरूक्तैकाभावान्न व्यभिचारः अथैव
१२० मपि घटादावानयेत्यादौ आनयनरूपार्थानुभावकधात्वादिपदानुसंधाने व्यभिचारो दुर्वार इति चेन्न एकशक्तिपदिकानु
संधानस्य हेतूकरणीयत्वात् एतेन नकारणत्वेकत्वादिघटादिपदानुसंधानेपि न व्यभिचारः अथवा एकधर्मावच्छिन्न
पदशक्तिद्वयविशेष्यत्वध्यानानुभावकत्वस्य साध्यमुपेयं आनयनादित्वं चैषां धातोरेकशक्तिविषय एवेति तत्तदनुभाव
केधातुपदानुसंधाने व्यभिचारः घटादिपदे चैकवचनत्वादिकं संख्यादिशक्ततावच्छेदकं तृतीयादित्वं च करणत्वादशक्तता
वच्छेदकं अतो न तदुभयमेकधर्मावच्छिन्नशक्तिद्वयमिति न घटादिपदानुसंधाने व्यभिचारः हरित्वतत्तद्वानरसर्जत्वाद्यवच्छि
न्नवाचकशालादिपदानुसंधाने विभिन्नरूपावच्छिन्नशक्तिद्वयविषयतात्रयवृक्षादिरूपैकधर्म्मविषयकानुभवे व्य
भिचारवारणाय शक्तिविषयत्वेपि द्वित्वं निवेशितं एकशक्तिविषयहरित्वरूपेण परशक्तिविषयसर्जबोधकसमान ग्म॰
पदानुसंधाने व्यभिचारवारणाय शक्तौ विषयताद्वयपर्य्यन्तनिवेशः न च मत्स्यादौ न्यग्रुभद्वेषेतत्तत्पूपणयोरपीति को १२०

शाद्धर्मद्वयधर्म्युभयविशेष्यकशक्तिद्वयवत्त्वमस्त्येपदानुसंधानेनतदुभयानुभावके व्यभिचार इति वाच्यं नीलादिपद
वद्धर्मिणि मत्त्वेपदस्य निरूढलक्षणायामेव कोशानुशासनयोर्नानार्थमध्यपाठात्तत्रैवेनोभयत्रशक्तत्वस्यैवगमेप
रस्परविषयाविषयकशक्तिद्वयमेवसाध्यघटकमुपेयं तथासतिशक्तिविषयेहित्वेन निवेशः शक्तिविषयत्वेनापि
निवेशः संभवतिशक्तिद्वयसाध्यादेर्नानार्थैतरपदानुसंधानेनानात्वादितिघटपटौद्वारणमस्यदृष्टान्तस्याविरोधः यथा
श्रुतानेकशास्त्रघटितसाध्याभिप्रायेणैवतस्यदृष्टान्ततयाउपन्यासः शक्तिद्वयघटितसाध्येनुदृष्टान्तान्तरमनुसरणी
यं घटपदेनैककार्थमात्रपरत्वग्रहविषयघटपदेत्यर्थः तेन नानार्थपरत्वग्रहविषयतत्पदस्यपक्षसमत्वेपि नक्षतिः
यदानुसंधानविषयत्वेननिवेशादुभयमतएवनानार्थानुभावकेत्र्यक्षपदेनांशतः सिद्धसाधनं त्र्यवच्छेदकावच्छेदेनसा
ध्यसिद्धेरुद्देश्यत्वेच विवादाध्यासितेतिन प्रणीयं त्र्यक्षपदत्वमेवपक्षतावच्छेदकं त्र्यक्षेणाक्षंयच्छतीत्यादौ त्र्यनेकार्थानुभा
वके त्र्यक्षादिपदेपक्षतावच्छेदकसत्वेपिनक्षतिः अत्रातोवाधस्यस्वसमानार्थकपदांतरानुसंधानदशायामेवतस्यनाना

121
१२१

र्थानुभावकत्वेन साध्यसत्त्वादनवकाशात् क्रमिकनानानुसंधानेनैकमशः समानार्थकपदांतरसहरैकेनेण युगप
देवनानार्थानुभावके ऽक्षादिपदे व्यभिचारवारणाय एकत्रैवारोप इति सनीतिशेषत्वारणमनुसंधानं तथा च स्व
समानार्थकपदांतरानुसंधाने सति विषयकानुसंधानांतरसहकारेण नानार्थानुभावकत्वमित्यर्थः घटावानपेसा
।दो नानानयनादिबोधके ऽज्ञानपेसादि पदे व्यभिचारवारणाय नानाशक्त्येति नानार्थेति स्वरूपकथनं नानाशक्त्यधीनबो
धे नानार्थविषयकत्वनियमेन व्यावर्तकत्वात् नानाशक्त्यधीनैकानुभवानुपधायकत्वस्य साध्यत्वे ऽनुसंधानांतरासहकारेण
तेन निवेशः स्वात् स नानार्थगोचरानुभवजनने ऽपि एकानुभवस्य नानाशक्त्यधीनतया साध्यसत्त्वात् स्वकीयनानाशक्त्यप्रयो
ज्यस्वसमानार्थकपदद्वयानुसंधानाजन्यशाब्दानुभवसामान्यकत्वं तु फलितार्थः एतेन यथाश्रुते प्रतियोग्यप्रसिद्धावपि न क्षतिः
एकार्थमात्रवाचकपदे स्वकीयनानाशक्त्यप्रसिद्ध्या साध्यासत्त्वान्न द्वारणाय हेतावर्थे नानात्वविशेषणं प्रकोनानात्वपर्यवसितं ग म॰ १२१
तथा च नानाशक्तिमत्त्वादित्यादिहेत्वर्थः पुष्पवंतादिपदस्य सूर्याचंद्रमसावुभयत्र एकैकशक्तिरिति नानाशक्तिमत्त्वरूपनाना

र्थत्वरूपहेत्वभावो हि तत्र व्यभिचारः शक्यैकत्वीयनानाशक्त्यघटितसाध्याप्रसिद्धेः एकमात्रकृतावच्छेदकावच्छिन्ननाना
शक्तिमत्त्वस्य हेतुत्वोपगमादेकवचनत्वादिना एकत्वादौ तृतीयात्वादौ शक्तेरेकवचनत्वादनुगतस्य दुर्वचतया विचारासहत्व
त्तियदिकत्वस्य हेतुघटकत्वोपगमात् घटादिपदे व्यभिचारः न चैवं नानात्वार्थानुभावकत्वमेव साध्यमस्तु नानाशक्तेस्त
र्थकं प्राप्तियदि केनैकमात्रस्यापि एकशेषस्थले एव नानार्थानुभवजनकतत्र लुप्तपदांतरानुसंधानस्य जनकतया पदांतरा
नुसंधानाजन्यानुभवघटितसाध्यस्य तत्त्वेन व्यभिचारानवकाशादिति वाच्यं ध्वंसाधानुगर्भप्रसंगपास्य तत्त्वरूपप्राप्तियदिकत्वस्यैव हेतु
तायामुपगम्यतया घटादावनयेत्यादिपदे ज्ञानयेत्यानयनद्वये बोधके व्यभिचारवारणाय नानाशक्तिघटितसाध्यादरणे नानार्थ
स्याक्षपदस्य पक्षतया अन्यस्य तत्समतया दृष्टान्तत्वासंभवात् दृष्टान्ते एकपदे अनेकार्थतात्पर्यग्रहविषयत्वसाध्यः नानार्थे तात्प
दस्य नानाशक्तिघटितसाध्यविकलतया नानार्थत्वरूपसाधनविकलतया च नानार्थे भिन्नानार्थधर्मावच्छिन्नशक्तिकत्वसाध्यः नाना
र्थवदित्यंतरं इत्यनुमानानां नानार्थस्थले आवृत्तिमंतरेण नानार्थानुभावकत्वसिद्धिरिति प्राचीनाः संप्रदायेन कार्ये तिष्ठगायदनेकार्थमा

122
१२२

त्सोपधानप्रयोजकसामग्र्या अनेकार्थप्रतात्पर्यस्थले नानादिसमवधानदशायां दुरपवादत्वेन पक्षे साध्यस्य बाधेनानु
मानस्यैवाप्रवृत्तेरित्यर्थः हेतुमति पक्षे साध्यहेतोः सोपाधित्वनियमादुपाध्यभावेनात्र बाध एव कथमित्याशंकामप
नेतुं उपाधिमाह सामग्रीविरहस्येति प्रथमानुमाने अनेकार्थाभावकताप्रयोजकसामग्रीसमवहितं यत्तदन्यत्वस्याने
कार्थपरत्वग्रहविषयपदानुसंधानरूपपक्षावृत्तितया तत्साधनाव्यापकस्य च घटपदानुसंधानरूपदृष्टांते साध्यव्या
पकस्योपाधित्वात् द्वितीयानुमाने च नानाम्नाता अनेकार्थानुभावकताप्रयोजकनिरुक्तसामग्रीसमवहितनिरुक्तैका
र्थपदानुसंधानाविषयत्वस्य पक्षभूतास्मपदे साधनाव्यापकस्योक्तदृष्टांते साध्यव्यापकत्वादित्यर्थः उक्तानुमानस्य प्रमा
णत्वे विभिन्नानां श्रोतॄणां अपि युगपद् द्विविधार्थप्रत्ययो न स्यात् एकपुरुषीयानुभवघटितनियमस्तु सुतरामप्रयोजकः
सामग्रीसत्त्वे विभिन्नपुंसोरिवैकस्यापि नानार्थबोधस्य दुरपह्नवत्वादित्याह तत एवेति सामग्रीसत्त्वयुगपदनेकार्थानुभ
वस्य दुर्वारतयोक्तानुमाने बाधादित्यर्थः भिन्नेति विभिन्नेत्यर्थः स्वरूपसत्तात्पर्यस्यानपेक्षां सूचयितुमाह भ्रमे चेति प्र राम०
१२२

त्तिपाद्ययोः अनेकार्थप्रतीतिर्विभिन्नार्थप्रतीतिः एको विलंबजन्मइति एकः प्रतिपाद्यः विलंबेनशाब्दबोधभंगं भवतीत्य
र्थः कस्यचिदिति बोधः कस्य विलंबेनान्वयबोध इत्यत्र विनिगमकाभावादिति भावः न च गुणपदे च वाक्यार्थद्वयस्य तात्पर्य
वाक्याद्बोधेन च वाक्यभेदो न स्यात् तावत्सदसमुदायरूपवाक्यस्यैकोत्तज्जन्यशाब्दबोधभेदस्य वाक्यभेदव्यवहारप्रयोज
कत्वादिस्यात् अद्वावाक्यभेदस्त्विति वाक्यभेदव्यवहारस्त्वित्यर्थः अर्थभेदात् प्रतिपाद्यविशिष्टार्थयोर्भेदात् नयपनयदानय
नयोर्भेदात् एतद्भूतलघटवत् पटवच्चेत्यादेर्वाक्यस्यैकत्वात् घटपटादिविशिष्टस्यैतद्भूतलादेरर्थस्याभेदात् तस्याद्व
घटपटावानयेत्यादिवाक्यस्य चैक घटमानय घटं चेत्यादावविशिष्टार्थभेदात् न चैतत्तन्नानात्वे वेकवाक्यतेति वाच्यं घटपटादि
पदयोः समासानुपपत्तिरेकवाक्यघटकयोरेव पदयोः समासप्रयोजकसामर्थ्यापगमादिति चेन्न अर्थभेदे पदेनार्थभे
देप्रयोजकविषयतयोः साक्षात्परंपरयानिरूप्यनिरूपकभावः घटमानय घटं चेत्यादिवाक्यजन्यसमूहालंबनबोधीयान
यनत्वादिप्रकारतायाविशेष्यभेदेन भेदोपगमात् न निरूपितनानानयनादिनिष्ठविषयतानां परंपरयापि निरूपकनि

रूप्यभावविरहइतिप्रागेवमुक्तत्वादितिम् तथाचनिरूपकनिरूप्यभावशून्यस्वविषयताशालिबोधपरत्वाकांभित्रवा
कां अन्यथाविधवाकामेकवाकं अर्थैकत्वादेकंवाक्यमितिजैमिनिसूत्रस्यापितैवतात्पर्यमितिमुख्यलक्ष्यपरपदस्थ
ले व्यावृत्तिर्नास्तीतिदर्शयतिगंगायामितिउपास्थितावितिशक्तिलक्षणारूपवृत्तिभ्यामितिजलघोषयोरितिप्रवाहतती
रास्यांइतिशेषः नतावृत्तिरितिशेषः प्रगयघ्नक्तिदूषापत्तिरिति एकपदवृत्तिद्वयस्वरूपपदत्वभावकत्वनियमभंगापत्ते
रित्यर्थः इष्टत्वादितितात्पर्यसत्वेवृत्तिद्वयाधीनबोधस्यावश्यकतयाउक्तनियमभंगस्येष्टत्वादित्यर्थः नन्वतात्पर्यसत्वेपिवृ
त्तिविरोधभंगायत्तात्पर्यविषयबोधाभावउपेतव्यइत्यतआह तात्पर्यादीनितात्पर्यविषयबोधानिर्वाहानुरोधात्त्वृत्तिः
फलंजनपतीस्कयेयतइतिशेषः इत्यनुरोधात्वृत्तिद्वयभावकल्पनानुरोधात्तात्पर्यंकदाचित्त्वविषयबोधानुपहित
मितिशेषः उच्छेदापत्तेः अबोधकत्वापत्तेः गौणीलक्षणापोर्वृत्तित्वासिद्धेरितियावत् तात्पर्यनिर्वाहार्थं तात्पर्यविषयबो राम
धनिर्वाहार्थमेवतयोः गौणीलक्षणयोः वृत्तित्वेनकल्पनातन्निर्वाहार्थं एकैकमात्रवृत्तिपरत्वे एकस्मिन्नेवतात्पर्यग्र १२३